नं० ४३५२-घ

माधवीयजैमिनिन्यायमालाविस्तरः चतुरध्या-
-यात्मकः

नं० ५३५२-घ

5352

#52/53 Common.

#80/81,82/83 Common.

114

पत्राणि ११६
११६

अ॰ मा॰
१

ॐ श्रीगणेशाय नमः ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् १ युक्तिंमानवनीतीविद्वंसिय्यधृति
भेदैर्विशेषार्थभोगाम्भोहः क्रमकृत्सयुक्तिनिपुणः स्वाख्यातिदेशोन्नतिः नियमस्फूर्त्यधिकारवान्नानसदाबाधः स्वतन्त्रेश्वरो जागर्ति श्रीकृतिमन्त्रसङ्कचरि
तश्रीबुक्कणक्ष्मापतिः २ यद्वत्सप्रतिपाद्यते प्रगुणयत्नात्सूत्रमन्त्रिप्रख्यातनयायंस्थितिमूर्तिमाकलयति श्रीबुक्कणः क्ष्मापतिः विद्यातीर्थमुनिस्तदात्म १
निलसन्मूर्तिस्तवत्र्याद्विकालेमास्यसत्वगुणैरखण्डितपदं साक्षात्समस्थ्योतते ३ इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैब्यस्य मेधातिथिर्धौम्यो धर्मसुतस्य वैन्यनृ
पतेः स्वौजा निमेर्गौतमः प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः ४ सत्वेतप्राज्ञजीवातुः सर्व
शास्त्रविशारदः अकरोज्जैमिनिमते न्यायमालां गरीयसीम् ५ तां प्रशस्य सभामध्ये वीरः श्रीबुक्कभूपतिः कुरु विस्तरमस्यास्त्वमिति माधवमादिशत्
मर्यादा ६ सर्वज्ञोभारतीतीर्थयतीन्द्रचतुराननात् कृपामवाप्याहंतोलब्ध्वापरार्ध्यप्रतिमोभवत् ७ निर्मायमाधवाचार्यो विद्वदानन्दकारिणीम् जैमिनीयन्याय ह्लादिनीम्
मालां व्याचष्टे बालबुद्धये ८ अस्यान्यायमालायाश्चादौ स्वकीयग्रन्थत्वद्योतनाय स्वसम्प्रदायमनेकार्थगर्भं देवतानमस्कारप्रतिपादकं श्लोकं पठति ॥
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् १ । इष्टदेवतां नमस्कृत्य चिकीर्षितार्थपरिपालनाय नायके विद्यमा पालकेस्वामिनि
नं महिमानमनुस्मरति युक्तिंमानवनीमित्यादि अत्र चिकीर्षिते धर्मशास्त्रे वर्तमानानां हृदशानामधिकारणानां ये प्रतिपाद्यार्थास्त एव नीतिशास्त्रोक्तराजधर्मा
स्तत्सर्वेषामस्मिन् भूपतावुपलभ्यन्ते नीतिपक्षे युक्तिंमानवनीतीविस्य युक्तिर्योगः सन्धिः साच युक्तिमान् वनीमानः सत्कारः चतुर्थं साम भेद दान दण्डोपाये
षु प्रथममुपायः साम वैरिणो बुद्धिभेदो द्वितीयः एताभ्यां दानदण्डावप्युपलक्ष्येते एतैश्चतुर्भिरुपायैर्विशेषेणार्थधनं भजतिप्राप्नोति एतावता शास्त्रत्रयः
प्रतिपादितः अवशिष्टेन तु राज्यप्रतिपालनप्रकारः प्रतिपाद्यते आपित्सुमात्रप्रभृतिषु पुरुषेषु यमीदृशस्य व्यापारस्य योग्यो नान्यस्य स्त्येवमासूहापोहकुश १
लः राजसभायामेतेन पण्डितः पूज्याविशादक्षिणाभागेउपवेशनीया एते च भृत्या वाममभागे इति क्रमं करोतीति क्रमकृत् ग्रामेष्वधिकृतास्तु कृषाणुचितबु तन्त्रदू॰
द्धिप्रदानेन प्रयोक्तुं निपुणः समुद्रपर्यन्तत्वेनाति वद्धलस्य देशस्योन्नतिः समस्तभोग्यवस्तुसंपत्तिः साच परराष्ट्रनिवासिभिः सकलप्राणिभिः स्याख्याते इदं
कर्तव्यमिदं नेत्येवं कार्याकार्यविषयस्फूर्तिस्तस्यामधिकारोस्य राज्ञो नित्यः सर्वत्राप्रतिहतबुद्धित्वात् गतो निवारितः सन्तानपरिविनामाबाधो विघ्नोयो १
न सगतसदाबाधः देशान्तराधिपतीनां राज्ञामेतदधीनत्वेनापरप्रेष्यत्वाद यं स्वतन्त्रः जगदीश्वरस्य विद्यातीर्थगुरोर्भोगमूर्तित्वेनायमीश्वरः यस्यश्रमा १

१ लु=३

कै

यां गोप्त्रीं रूपप्रसक्तो वेदार्थविषयत्वेनानुष्ठानिमान् यदीयं चरितमपि निरंतरं वेदोक्तरहस्यार्थध्यानतत्परत्वेनानुष्ठानमिह भवति सोयं श्रुतिमनुसंगवरितः प
वं विधो बुक्कक्ष्माभृत्तिरन्तः परमेश्वरध्याने वहिः प्रजापालने च नितरां जागर्त्ति यथा नीतिशास्त्रोक्तेषु साम भेदादिषूपायेषु कुशलः तथा सर्वज्ञत्वावतारत्वा
द्धर्मशास्त्रोक्तेषु प्रमाणादिप्रसंगां तेषु ध्यायार्थेषु कुशलः तेचाध्यायार्था उपरिष्टात्संदर्शयिष्यन्ते, अतः सर्वज्ञत्वं सोपपत्तिकं प्रकटयति यद्वृत्तमित्यादि त
इति द्वितीयश्लोकेन सर्वास्वपि सन्त्रप्रतीयमानेष्वपरं ब्रह्म तदेव शैवागमेषु सृष्टिस्थितिसंहारतिरोधानानुग्रहलक्षणपञ्चकृत्यसिद्ध्यर्थमीशानत
त्पुरुषाघोरवामदेवसद्योजातवामदेवसद्योजातलक्षणानां पञ्चानां मूर्तीनां पृथक्प्रसिद्धिं विस्तारं वा प्रगुणय्य निष्प्रकटीकरोतीति प्रतिपाद्यते तत्रता
दृशस्त्रिविधं भूपालः स्थितिमस्मिन् धत्ते तस्यामन्त्रैरात्मनि लसद्विद्यातीर्थमुनिः कृत्स्नस्य जगतोऽनुग्राहिका मूर्त्तिरिष्टुच्यते यस्माज्ज्ञायं भूपो वेदान्तो
क्तं परं ब्रह्म यस्माच्च शैवागमोक्ता दर्शनेश्वरस्य स्थितिमूर्तिः यस्माच्च श्रीविद्यातीर्थमुनिस्तत्रात्मनि संध्याय प्रकाशते तस्मात्सर्वज्ञत्वमस्य राज्ञ उक्तेषणा
विहृतदक्षिणागोपालमविवादेन प्रतिभासते उक्तगुणोपेतस्य राज्ञो मन्त्रिणा नानाप्रसिद्धहरन्नैर्हितकारितया प्रशंसति इन्द्रस्येति श्लोकेन चिकीर्षि
तग्रन्थे श्रद्धातिशयस्तस्मादपि ततविद्यमानं कर्तुं गौरवं प्रकटयति श्रुतिस्मृतिश्लोकेन श्रुतिस्मृतिसदाचारपालको माधवो बुधः साङ्गं व्याख्याय सर्वा
र्थं द्विजार्थं श्रौतग्रहतः सर्ववर्णाश्रमानुग्रहाय पुराणसारपराशरस्मृतिव्याख्यानादिकं स्मार्तं धर्मं एवं व्याख्याय इदानीं द्विजानां विशेषानुग्रहाय
श्रौतधर्मव्याख्यानाय प्रवृत्तः ग्रन्थं प्रारिप्सुर्गुरुमूर्तिं सर्वाधिकं सकलवेदशास्त्रप्रवर्तकत्वेनाभिचितेष्टदेवतारूपं परमेश्वरमादौ नमस्कृत्य श्रोतृप्रवृत्तिसि
द्ध्यर्थं विषयप्रयोजने दर्शयन् ग्रन्थं प्रतिजानीते । प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम् १ ॥
जैमिनिप्रोक्तानि धर्मनिर्णायकान्यधिकरणानि न्यायाः तेऽस्य ग्रन्थस्य विषयः पठितॄणां तत्र प्राक्तैः कतिपयैरेव श्लोकैस्तेषां स्फुटीभावः प्रयोजनम् न्यायमा
ला संगृह्यत इति ग्रन्थनामनिर्देशपूर्विका प्रतिज्ञा १। करिष्यमाणस्य ग्रन्थस्य प्रकारं दर्शयति एको विषयसन्देहपूर्वपक्षावभासकः श्लोकोऽपरस्तु सि
द्धान्तवादी प्रायेण कथ्यते २। चत्वारोऽवयवास्त्वेकश्लोकेनोक्ताः क्वचित्क्वचित् यत्र क्वापि बहुश्लोकैरुच्यन्ते ततो न विस्तरः ३ सर्वेषामपि संदेहेनाधिका
मतिसंग्रहः मीमांसासागरस्तेन क्रीडापुष्करिणी कृता ४। एकैकस्याधिकरणस्य विषयः सन्देहः संगतिः पूर्वपक्षः सिद्धान्तश्चेति पञ्चावयवाः तत्र
संगतिरन्तरमेव व्युत्पादयिष्यमाणेन प्रकारेण प्रत्यधिकरणं स्वयमेवोहितुं शक्यते अवशिष्टानां चतुर्णामवयवानां संग्रहाय क्वचिद्द्वद्वः श्लोकाः
क्वचिदेकस्यावा पोहापाभ्यां ततः प्रत्यधिकरणं श्लोकद्वित्वसंख्यापर्यवस्यति अतो बहूनामधिकरणानां ग्रन्थगौरवशंका न कर्तव्या तथैव ग्रन्थबाहुल्या

न्या॰ मा॰ मी॰ २

भावं स्फुटीकर्तुं रूपकव्याजेन स्वबोधत्वं दर्शयति श्लोकेन श्लोकाभ्यां वा श्लोकैर्वा यथायोगं न्यायः संगृह्यते सर्वथापि न्यायसंग्रहरूपो ग्रन्थः श्लोकस
हस्रद्वयपर्यन्तैर्वर्गैर्वा समाप्यते न तु सहस्रद्वयमतिक्रामति भाट्टदीपिकादीनां बहुग्रन्थत्वाद् दुरवगाहत्वाच्च मीमांसासागरसमासेन क्रियमाणे
न तेनानेन संग्रहेण दोषद्वयरहितेन राजपुत्राणां बालानां कृते ग्रन्थे निर्मितत्वान्नाभिदद्म शङ्कनीया समा भविष्यति यद्यपि शास्त्रदीपिकादौ क्वचिन्न्यायसंग्रह
श्लोकोऽस्ति तथापि न सर्वत्र विद्यते यत्रास्ति तत्रापि विषयसंशययोरसंग्रहात् न श्लोकपाठमात्रेणाधिकारेणानुपपन्नसिद्धान्तावगतेः अतो न कापि गतार्थत्वं प्र
कनीयम् ॥ ४ ॥ संगतिं सूत्रयति शास्त्राध्यायपादन्यायसंगतयस्त्रिधा शास्त्रादिविषयेऽज्ञाते तत्संगतिरूह्यताम् धर्मो द्वादशलक्षण्या
सूत्राद्यलक्षणैः प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः २ अधिकारोऽतिदेशाख्यः सामान्येन विशेषतः ऊहो बाधश्च तन्त्रं च प्रसंग इत्युदिताः क्रमात् ३
शास्त्रसङ्गतिरध्यायसङ्गतिः पादसङ्गतिरिति त्रिविधा संगतिः सा च शास्त्रादीनां त्रयाणाम् असाधारणे विषये ज्ञाते सति स्वयमेवोहितुं शक्या शास्त्रस्याध्या
यानां च साधारणं विषयं दर्शयति लक्षणेत्यध्यायाः द्वादशानां लक्षणानां समाहारो द्वादशलक्षणी तादृशस्य द्वादशाध्यायोपेतस्य मीमांसाशास्त्र
स्य धर्मो विषयः प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमाद् द्वादशानामध्यायानां विषयः प्रथमेऽध्याये विध्यर्थवादादिरूपं प्रमाणं निरूपितम् द्विती
ये यागदानादिकर्मभेदः २ तृतीये प्रयाजादीनां दर्शपौर्णमासाद्यर्थत्वेन तच्छेषत्वम् ३ चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्त्यानुष्ठानं न तत्क्रत्वर्थप्रयु
क्त्येत्येवमादयः ४ पंचमे क्रमनियतिविधेयत्वादयः ५ षष्ठेऽधिकारो नान्धादेरित्यादयः ६ सप्तमे सन्तु वचनेन च सामान्यतोऽतिदेशः ७ अष्टमे सो
ऽयं चरुर्निर्वपेदित्यत्र निर्वापेतरविहितेन द्रव्यतानिर्देश एकदेवताको भावार्थपकत्वमित्यादिलिङ्गेनाग्नेयपुरोडाशविकारत्वेनानैवमादि विशेषतोऽति
देशः ८ नवमे प्रकृतावग्नये जुष्टं निर्वपामीति पठिते मन्त्रे विकृतौ सौर्ये चरावग्निपदपरित्यागेन सूर्यपदप्रक्षेपेण सूर्याय जुष्टं निर्वपामीत्येवमादिरूहः
९ दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणासंभवेन लोप इत्येवमादिर्बाधः १० एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठि
तेन प्रयाजाद्यङ्गेन सर्वेषामनुग्रहेणोपकारसंपत्तेस्तन्त्रं नामोक्तम् ११ द्वादशे पशुर्थानुष्ठितैः प्रयाजाद्यङ्गैः पश्वङ्गपुरोडाशेषु उपकार इत्यादिः प्रसङ्गोक्तः १२
॥ पादानामसाधारणं विषयं दर्शयति ॥ विध्यर्थवादस्मृतयो नामधेयमिति चतुर्विधम् प्रथमाध्यायगैः पादैस्तैर्मानमीरितम् १ उपोद्घातः कर्म
भेदे मानं तस्यापवादगीः प्रयोगभेदस्त्वेतेहि द्वितीयाध्यायपादगाः २ श्रुतिर्लिङ्गं च वाक्यादिविरोधः प्रतिपत्तयः अनारभ्योक्तिर्बहूर्थत्वाद्यनुष्ठानस्वपाद
गाः ३ प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता फलचिन्ता जघन्याङ्गचिन्तेत्येवं चतुर्थगाः ४ । प्रथमे पादे विधिरूपं मानमीरितम् १ द्वितीये वादरूपम् १

धर्म इति

उपकार इत्यादि तन्त्रम्

धर्मे न

२

प्रधानस्योपकारोपकाराधानुष्ठितेन प्रयाजाद्यङ्गेन ४७

अर्थवादो मंत्रस्याप्युपलक्षकः २ तृतीये स्मृतिनिरूपणम् स्मृतिः सदाचारमप्युपलक्षयति ३ चतुर्थे उद्भिच्चित्रादिनामरूपं ४ द्वितीयाध्यायस्य प्रथमे पादे आ।
ख्यातमेवापूर्वबोधकमपूर्वसद्भावश्चेत्यादिकः कर्मभेदचिन्तोपयुक्तोऽपोद्घातो वर्णितः द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्मभेदः तृतीये रथन्तरादी
नां कर्मभेदप्रमाणापवादः चतुर्थे नित्यकाम्यप्रयोगयोर्भेदः २ तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारि
ता द्वितीये लिङ्गम् २ तृतीये वाक्यप्रकरणादि ३ चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः क्रत्वादेः परस्परविरोधसद्भावः ४ ५ स.
पंचमे प्रतिपत्तिकर्माणि ५ षष्ठे नारभ्याधीतानि ६ सप्तमे बहुप्रधानोपकारकप्रयाजादीनि ७ अष्टमे याजमानानि ८ ॥ ३ चतुर्थाध्यायस्य प्र
थमे पादे प्रधानभूतामिक्षादध्यानयनस्य प्रयोजकत्वादि प्रधानप्रयोजकत्वं विचारितम् १ द्वितीये त्वप्रधानं वत्सापाकरणं शाखाच्छेदप्रयोजक
मित्यादि अप्रधानप्रयोजकत्वम् २ तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफललाभाभावचिन्ता ३ चतुर्थे राजसूयगतजघन्याङ्गत्वप्र
तादिचिन्ता ४ ॥ ४ ॥ क्रत्वादिभिः क्रमस्तस्य विशेषो वृद्ध्यवर्द्धने क्रत्वादेर्बलिता चेति पञ्चमाध्यायपादगाः १ ॥ पञ्चमाध्यायस्य प्रथमे पादे श्रुत्य\
र्थपाठादिभिः क्रमो निरूपितः १ द्वितीये वाजपेयगतेषु सप्तदशसु पशुषु एकैकधर्मसमापनमित्यादिक्रमविशेषः २ तृतीये पञ्चप्रयाजादीनामा
स्वाहूति ४ वर्तनैकादशत्वमित्यादि वृद्धिः ग्रहाभ्यासवृद्धिनिर्णयो नित्यादिवृद्ध्यभावः ३ चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः ४ ॥
५ । अधिकारी तस्य धर्माः प्रतिनिध्यर्थलोपने दीक्षासत्रं देयवह्नीष्टपदे समीरिताः १ ॥ षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः कर्तृस्वत्वादे
नोऽस्ति स्त्रियाश्चाधिकारः स च पत्न्या सह स्वत्वमादिनाधिकारी निरूपितः १ द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नं फलं दर्शपूर्णमासयोः कर्तुर्नियमः
काम्ये कर्म समापनीयमित्येवमादयोऽधिकारिधर्मा उक्ताः २ तृतीये द्रव्यस्य प्रतिनिधिरस्ति देवतादीनां मंत्रादीनां च स नास्तीत्यादि निरूपणम् ३ अधिकारिणश्च.
चतुर्थे पदार्थलोपनं विचारितम् अवदाननाशे सत्याज्येन यजेदित्याद्यर्थस्य नाशे सति शेषात्त्वग्रहणमित्यादिकम् ४ पञ्चमे कालापराधेन चन्द्रोद
ये सत्यभ्युदयेष्टिः प्रायश्चित्तं ज्योतिष्टोमस्यैकादशयोर्दीक्षादशाहस्य द्वादशाहीनत्वमित्यादिकं निरूपितम् ५ षष्ठे सत्राधिकारिणस्तुल्यकल्पा
एव सत्रं विप्रस्यैवेत्येवमादिकं चिन्तितम् ६ सप्तमे पित्रादिकं न देयं महाभूमिर्न देयेत्येवमादि देयविचारः ७ अष्टमे लौकिकाग्नावुपनयनहो
मः स्थपतीष्टिस्त्वेत्येवमाद्यौ विचारः कृतः ८ । ६ । प्रवृत्ते कार्यतो देशो यः शेषः सामनिरूपणम् नामलिङ्गानि देशो हि सप्तमाध्यायपादगाः । १ ॥

स्विन अग्न्यादीनां

सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छ्येनेनेत्यादिशब्दवचनातिदेशः १ द्वितीये रथन्तरशब्देन गानमात्राभिधानाद्गानमेवातिदेश्यमि
अ॰मा॰ ३ त्येतादृशः पूर्वोक्तातिदेशस्य शेषो विचारितः २ तृतीयेऽग्निहोत्रातिदेशः ३ चतुर्थे निर्वापो वधृद्रव्यलिङ्गातिदेशः ४ ॥ स्पष्टालिङ्गाद्यास्य
सूत्रस्वबलादपवादतः अतिदेशविशेषाः सप्तमाध्यायपादगाः १ ॥ अष्टमस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः तद्यथा सौर्ये चराव
तिदेशकोऽग्नि निर्वापस्तद्धितेन देवतानिर्देशः एकदेवतात्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि १ द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशस्तद्यथा वाजि
नेहविः सामान्येन लिङ्गेन पयो विध्यन्तोऽतिदिश्यते तच्च लिङ्गमस्पष्टं शीघ्रं तद्दुग्धं तस्मादमात् २ तृतीये प्रबलेन लिङ्गेनातिदेशस्तद्यथा आमिक्षा
रिकेषाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु दैवतेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्तप्राप्तिर्द्विदैवत्यत्वेन लिङ्गेन प्रथमे आग्नावैष्णवे तृतीय
स्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः प्रबलं च द्विदैवत्यत्वं शब्दोच्चारणमात्रेण सहसा प्रतिभासते क्रमस्तु विलम्बितप्रतीत्या दुर्बलः ३ चतुर्थे दर्वि
होमेष्वतिदेशोऽपोद्यते ४ ॥ ऊहारम्भो यत्सामोहो मन्त्रोहस्तत्प्रसङ्गतः नवमाध्यायपादेषु चतुर्षु ते प्रकीर्तिताः १ ॥ नवमाध्यायस्य प्रथमे पादे उपो
हात्सर्वकर्मूहविचारप्रारम्भः तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः अवघातमन्त्रादिषु विवक्षितं व्रीह्यादिस्वरूपसाधनविशेषणमात्रं विवक्षि
विं ४ तमित्यादिरूपोहात् सवितृस्थशब्दानां विकृतिष्वनासोहः अग्निशब्दस्यास्य हरणादिक ऊहविचारारम्भः १ द्वितीये सपरिकरः सामोहः तृ
तीये मन्त्रोहः ३ चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः ॥४॥ द्वारलोपस्य विस्तारः कार्यैकत्वं समुच्चयः ग्रहसामप्रकीर्णानि दशमस्याष्टपादगाः १ ॥
वेद्यादिबाधान॰ दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः तद्यथा स्वयंकृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन तन्निष्पादकानामुद्धन१
नादीनां बाधः कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः द्वितीये संक्षेपेण कृत्स्नद्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः २ तृतीये
बाधकारणं कार्यैकत्वं तद्यथा प्रकृतौ गवाश्वादिदक्षिणायाः ऋत्विक्परिक्रयः कार्यं तथा विकृतिरूपे भूतनाम्नि कृष्णले धेनुरूपायां दक्षिणायां स एव कार्यमि
तो धेन्वा गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते ३ चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्ते रथादिसमु
च्चयः ४ पञ्चमे षोडशी ग्रहः प्रकृतिगामी सन्नग्न्याधेयप्रणयनादेर्वर्गहीनत्वं रत्यादिर्बाधप्रसङ्गतो ग्रहादिविचारः ५ षष्ठे साममन्त्र विशेषमित्यादिबाध २
प्रसंगागतः सामविचारः ६ सप्तमे पश्वङ्गः पुरोडाशविभेदो गृहमेधीयमपूर्वकर्मेत्यादिबाधप्रसङ्गतः प्रकीर्णविचारः ७ अष्टमे नानुयाजेष्विति पर्युदासो१

ग

शाधान्येन यवक्रीतोर्विकल्पइत्यादिकं ६

चतुर्थे चेद्वारहस्य मपाञ्जानुवाकाद्युपलक्ष्योर्विकल्पइत्यादिकं शाधान्येन
पाञ्जानुवाकयोः समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम् ६

नुसोम इत्यर्थवादो नातिरात्र इति प्रतिषेधः इत्यादिबाधोपयुक्तोनन्तर्थे विचारः ८।। ऊपोह्यानन्तरं प्राप्तावापोद्वापौ तत्र सविस्तरेतिः आवापविस्तर
विशेषे काद्वादशाध्यायस्य पादगाः १ एकादशाध्यायस्य प्रथमे पादे तन्त्रस्यापोह्याभ्यां वर्णितः १ द्वितीये तन्त्रावापौ सहेतुके प्रसंगतो २ तृतीये तन्त्रसुदाहर
षष्ठे=३ णबाहुल्येन प्रपञ्चितम् ३ चतुर्थे तस्यैवावापः प्रपञ्चितः ४।। ५। प्रसङ्गस्तन्त्रनिर्णीतिः समुच्चयविकल्पने द्वादशाध्यायपादार्था इति पादार्थसं
ग्रहः १। द्वादशाध्यायस्य प्रथमे पादे पशुधर्माणां पशुपुरोडाशे प्रसङ्गः सौमिकवेदेरुत्तरकालीनकर्मस्वित्यादि प्रसङ्ग इत्यादि विचारितम् १ द्वि
तीये सवनीयपशोस्तन्त्रित्वेन तत्सवनीयपुरोडाशानां विकृतिस्तन्त्रिणीनत्वप्रकृतिरित्यादिविचारः २ तृतीये त्वन्वासमोः समुच्चयः आधारगतानां १ द्वा
स्रुगन्तत्वसन्ततवादीनां समुच्चय इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम् ३ १२ ऊपोह्यानापवादाभ्यां प्रसङ्गानुप्रसक्तः तत्र त्यादगतत्वेन वि
चारान्तरमनुमेयेत १। धात्वन्तरे पूर्वोत्तरीभावोऽध्यायानामभिधास्यते पादानां तत्र पूर्वो वक्ष्यो वलेशाद्युपादयामरे २ विधिः सात्ताभिति दिर्दैर्मतत्सशेषार्थवाद
गीः वेदमूलास्मृतिर्नाम वाक्यांशो नीयतः क्रमः ३ तदेवं द्वादशाध्यायगतेषु षष्टिसङ्ख्याकेषु पादेषु प्रतिपाद्यास्त्वर्थाः संगृहीताः ननु यथोक्तेभ्यः पादार्थे
भ्योन्येप्यर्था बहवस्तत्रमादेषु विचार्यन्ते तेषां कथं तत्तत्पादान्तर्भाव इत्याशङ्क्याह यथोक्तपादप्रतिपाद्यादन्येप्यर्थेषु यथोचितं कश्चिदूपोह्यादौ कश्चिद अध्यायपादयोः
पवादः कश्चित्प्रसङ्गेप्यतिः कश्चिदनुप्रसङ्ग इति तस्मिन्नेव पादान्तर्भावस्त्वन्नेयः ननु सत्त्वेवमध्यायानां पादानां चैवमवस्थितार्थास्तदीयस्तु कथमवगन्न क्रमः
यत्रस्मतमाह एक स्मिन्नध्याये समाप्ते सत्यध्यायान्तरारम्भेतयोरध्याययोः पूर्वोत्तरीभावो वक्ष्यते प्रथमाध्यायपादानां पूर्वोत्तरीभावेश्वराहू ते सति तद्युत्प पादानां
शास्त्रइति त्यापादान्तरेवपितस्योक्तेति त्वंशकात यान शुदाहृरति १ जिज्ञास्यत्वेन प्रतिज्ञातो धर्मो विधिवाक्यं सात्त्वप्रमाणमिति तद्विचारः प्रथमे पादे सूक्तः अर्थ
विधिरिति ६ वादवाक्यस्य विधिद्वाराप्रामाण्यं हि ध्यनन्तरभावित्वं स्मरति वाक्यस्यार्थवाद विधिरूपवेदमूलत्वेन प्रामाण्यात्‐ द्वितीयपादोत्तरभावित्वेनाभिधे अद्विताय...
यस्य वाक्यैकदेशत्वेन सर्वोक्तत्रिविधवाक्यविचारोत्तरकालीनत्वम् अनेन न्यायेनोत्तराध्यायगतपादानां परस्परक्रम उन्नेयः ।। उक्तं यास्त्रसाध्याया
नां पादानां च क्रमविशेषविशिष्टानामसाधारणं प्रतिपाद्यार्थं निरूप्य तन्निरूपणस्य फलं दर्शयति । ऊहितासङ्गीस्तित्सत्त्याबान्तरसङ्गतिम् ऊहेदा
ते पदद्वान्तप्रमुदाहरणादिकम् १। शास्त्रादिप्रतिपाद्यार्थसबन्धितयाधिकरणे योजिते सति तस्याधिकरणस्य शास्त्रसङ्गतिरध्यायसङ्गतिः पाद
सङ्गतिश्चेति तिस्रः सङ्गतय ऊहिता भवन्ति तद्यथा प्रथमाध्यायप्रथमपादस्य द्वितीयाधिकरणे धर्मस्य लक्षणप्रमाणे सहितेर्वपदीकृत्य तत्सङ्गा

उपोद्घातसंगतिः २

भ॰ मा॰ ४

वः प्रतिपादितः तस्याधिकरणस्य धर्मसंबन्धित्वया धर्मविचारशास्त्रे सङ्गतिः प्रमाणविचाररूपत्वात् प्रथमाध्याये सङ्गतिः विधिवाक्यस्य प्रमाणत्वेनोप
न्यासात् प्रथमपादसङ्गतिः यद्येतत्सङ्गतित्रयमुद्दितं तत्र पूर्वोत्तराधिकरणयोः परस्परमवान्तरसङ्गतिरूहनीया सा चानेकरूपा आक्षेपसङ्गतिः दृ
ष्टान्तसङ्गतिः प्रत्युदाहरणसङ्गतिः प्रासङ्गिकसङ्गतिः अपवादसङ्गतिश्चेत्येवमादिरूपाः तासामाक्षेपादिसङ्गतीनामुदाहरणमादयति । तदेतत्सर्वं यो
अधिकरणस॰ जयित्वा प्रदर्श्यते ॥ सर्वत्राधिकरणस्य सिद्धान्तयुक्तिं वीक्ष्य परेण यत्पूर्वपक्षयुक्तिं च तत्राक्षेपादि योजयेत् १ । प्रथमाध्याये प्रथमपादस्य प्रथमाधिकरणे
धर्मविचारशास्त्रं वैधमिति सिद्धान्तः अर्थज्ञानहेतावध्ययने नियमविधेः संभवादिति तद्युक्तिः द्वितीयाधिकरणे धर्मे लक्षणं प्रमाणं च नास्तीति पूर्व
पक्षः लौकिकाकारहीनत्वान्मानान्तराप्रवृत्तेश्चेति तद्युक्तिः तया युक्त्या धर्मस्य लक्षणप्रमाणरहितत्वे सति निरविषयत्वात्सम्मो धर्मे रतिन तद्विचारशास्त्र
स्याविधेयत्वमनुपपन्नमित्याक्षेपसङ्गतिः यथा च प्रथमाधिकरणे नियमविधिसंभवेन वेदेऽर्थविचारशास्त्रस्य विधेयत्वमुक्तं तथा द्वितीयाधिक धर्मे १
रणे लौकिकाकारहीनत्वमप्रत्यक्षाद्यप्रवृत्तिरूपेण हेतुना धर्मे लक्षणप्रमाणराहित्यं वक्तव्यमिति दृष्टान्तसङ्गतिः यथा च प्रथमाधिकरणसिद्धान्ते सर्वो
क्ता युक्तिः खलोक्यते तथा द्वितीयाधिकरणसिद्धान्ते काचिदपि युक्तिं न पश्यामः इति प्रत्युदाहरणसङ्गतिः एते दृष्टान्तप्रत्युदाहरणसङ्गती मन्दबु
द्धिभिरपि सर्वत्रोत्प्रेक्षितुं शक्येते अपि च पञ्चमाधिकरणे विधिवाक्यस्य निरपेक्षत्वात्प्रामाण्यं वर्णितं तस्य च वाक्यस्य शब्दार्थयोर्मध्ये शब्दकोटिनिवि
ष्टत्वात् वाक्यप्रसङ्गेन शब्दनित्यत्वं षष्ठाधिकरणे वर्ण्यत इति प्रासङ्गिकसङ्गतिः अपि च सप्तमाध्यायस्य चतुर्थपादे द्वितीयाधिकरणे च सौर्यादिवि
कृतिषु वैदिकमङ्गजातमतिदेष्टुं तदुपयोगित्वेन प्रथमाधिकरणे धर्मसापेक्षत्वं साधितं तत्र प्रथमाधिकरणस्योपोद्घातः सौर्यमुत्तराधिकरणेन
सह सर्वाधिकरणस्योपोद्घातसङ्गतिः अपि च प्रथमाध्याये तृतीयपादस्य प्रथमाधिकरणोदकादिस्मृतेः प्रामाण्यमुक्तम् द्वितीयाधिकरणे सर्ववेद
धनस्मृतेः पूर्ववत्प्राप्तं प्रामाण्यमपोद्यते सोयमपवादसङ्गतिः अनया दिशा सर्वत्र सङ्गतिरूहनीया ॥ इत्थं सङ्गतीरुत्पाद्याद्यप्रथमाधिकरणे विष
यसंशयपूर्वपक्षसिद्धान्तांश्चतुरो ऽवयवान्संजिहीर्षुः प्रथमाध्यायस्य प्रथमपादे प्रथमाधिकरणं भट्टमतेनारचयति स्वाध्यायोऽध्येतव्यस्य विधा
नस्य प्रयुक्तितः विचारशास्त्रं नारम्भमारभ्यं वेति संशयः १ अर्थं धीहेतुनाधीते लौकिकसिद्धावघातवत् नियामकं चैनेवातोवेधारम्भो न सम्भवी २ द
र्शसवेदस्याक्त्वस्यैव नियामकम् अर्थनिर्णायकं शास्त्रमतस्त्वारम्भणीयं विधेः ३ चोदनालक्षणोऽर्थो धर्मस्तदारम्भात्वाद्दार्थेच दर्शनादिमतदन्तैरिमिति

त्र

धर्मो १

प्रोक्तं सत्त्वज्ञाने धर्मे विचारशास्त्रं तदेतस्य प्रथमाधिकरणस्य विषयः स्वाध्यायोऽध्येतव्य इत्ययमध्ययनविधिरक्षरग्रहणमात्रपर्यवसायीति केचिन्म-
न्यन्ते अपरे त्वेवमाहुः अर्थज्ञानरूपदृष्टप्रयोजनायेदमध्ययनं विधीयते अर्थज्ञानं च विचारमन्तरेण न संभवतीति ततो विधिर्विचारशास्त्रस्य प्रयो-
जक इति तत्रैवं संशयः इदं विचारशास्त्रं किं विधिप्रयुक्त्यानारम्भणीयमुतारम्भणीयमिति तत्रार्थज्ञानार्थाध्ययनस्य विधिरिति वदन्नुक्तादोष-
माह किमयमन्नमप्राप्तमध्ययनं विधीयते किं वा पक्षे प्राप्तमवघातवन्नियम्यत इति नाद्यः विमतं वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वाद्भार-
ताध्ययनवदित्यनुमानेनैव विधिनिरपेक्षेण प्राप्तत्वात् तर्हि स्तु द्वितीयः पक्षः अवघातवत्तद्वन्नियमविधित्वसम्भवात् यथा नखैरवघातेन वा
तण्डुलनिष्पत्तिसम्भवात्पक्षे प्राप्तोऽवघातो विधिनाऽवश्यकर्तव्य इति नियम्यते तथा लिखितपाठेन गुरुपूर्वकाध्ययनेन वार्थज्ञानसंभवात्पक्षे
प्राप्तमध्ययनं विधिना नियम्यतामिति चेन्न वैषम्यात् अवघातेन निष्पन्नैरेव तण्डुलैरवान्तरापूर्वद्वारेण दर्शपूर्णमासौ परमापूर्वं जनयतो नान्य-
दर्शपूर्णमासा था ततो दर्शपूर्णमासापूर्वमवघातस्य नियमहेतुः अत्र तु लिखितपाठजन्येनाध्ययनजन्येन वार्थज्ञानेन क्रत्वनुष्ठानसिद्धेरध्ययनस्य नियमे हेतुर्नास्ति
अतो हि विधिविधुरस्यासम्भवादर्थज्ञानहेतुविचारशास्त्रारम्भस्य वैयर्थ्यं तन्नास्ति तर्हि श्रूयमाणविधेः का गतिरिति चेत् स्वर्गो यावदक्षरग्रहणमात्रं विधे- स्म
यमिति वदामः अश्रुतोऽपि स्वर्गो विश्वजिन्न्यायेन कल्पनीयः स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति सूत्रेण विश्वजित्यश्रूयमाणमप्यधिकारिणं केषां=
स्थापितं सम्पादयितुं तद्विशेषणं स्वर्गफलं युक्त्या निर्णीतं तद्वदध्ययनेऽप्यस्तु । एतदेवाभिप्रेत्योक्तम् । विनापि विधिना दृष्टलाभान्न हि तदर्थता कल्प्यस्तु वि-
धिस्तामर्थात्स्वर्गो विश्वजिदादिवदिति एवं च सति वेदमधीत्य स्नायादिति स्मार्तमनुगृह्यते अस्मिन्शास्त्रे वेदाध्ययनसमावर्तनयोर्नैरन्तर्यं प्रतीय-
वार्थि= ते तत्र वेदमधीत्यापि वेदधर्मविचाराय गुरुकुले वासः कर्तव्यः तथा सति तन्नैरन्तर्यं बाध्येत तस्माद्विचारशास्त्रस्य वैधत्वाभावादक्षरमात्रेण स्व- धर्म
र्गसिद्धेः समावर्तनशास्त्राच्च धर्मविचारशास्त्रं नारम्भणीयमिति पूर्वपक्षः अत्रोच्यते यदुक्तं लोकसिद्धत्वादप्राप्तविधिरिति तन्न पक्षे प्राप्तत्वात्तु नियमविधि-
त्वं तन्न वारयितुं शक्यं यथा दर्शपूर्णमासजन्यं परमापूर्वमवघातनियमजन्यस्यावान्तरापूर्वस्य कल्पकं एवमेव क्रतुजन्यमपूर्वं जातं क्रतुज्ञानसाधना- मसेष=
ध्ययननियमजन्यस्यापूर्वस्य कल्पकं भविष्यतीति नियमादृष्टानङ्गीकारे श्रूयमाणो विधिरनर्थकः स्यात् न च विश्वजिन्न्यायेन स्वर्गार्थत्वं युक्तं दृष्ट-
फलेऽर्थज्ञाने संभवत्यदृष्टस्य कल्पयितुमशक्यत्वात् अत एवोक्तम् लभ्यमाने फले दृष्टे नादृष्टफलकल्पना विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यतीति

अ॰ मा॰
५

व॰४

नन्वेवमपि स्वकृतव्याकरणाद्यङ्गस्याधीतवेदस्य पुरुषस्यार्थज्ञानसंभवाद्विचारशास्त्रस्य वैयर्थ्यमिति चेत् न ज्ञानमात्रसम्भवेऽपि निर्णयस्य विचा-
राधीनत्वात् अक्ताः शर्करा उपदधातीति अत्र घृतेन वा तैलादिना वेत्यनिर्णयो व्याकरणे न निगमेन न निरुक्तेन वा न सिद्ध्यति विचारशास्त्रं त्वेतेजो
वै घृतमिति वाक्यशेषात् घृतं निर्णाययिष्यति अतो विचारो वैधः वेदमधीत्य स्नायादिति शास्त्रेऽध्ययनसमावर्तनयोः पूर्वापरीभावसमानक-
र्तृकत्वप्रतीतेर्नान्तरं तस्माद्विधिवशादेव विचारशास्त्रमारम्भणीयमिति सिद्धान्तः । अस्मिन्नेवाधिकरणे गुरुमतमाह । अथवाध्याय-
नासिद्धेर्नैवास्त्यध्ययने विधिः तेन पूर्वोत्तरोपन्यासोऽप्रसाध्यावयवाद्भूमिः १ विधेयाध्यापनं सिद्धं द्वालस्यार्थधियं विना तेन निर्विषयं शास्त्रं निःफलं चे-
त्युपेयताम् २ स्वतः प्राप्तार्थबोधस्य विवक्षानपनोदनात् विषयादिसम्पादे शास्त्रमारभ्यतां ततः ३ । अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत् इति विहिते । यीत तमध्यापये॰
न चात्र नियोज्याभावः आचार्यत्वकामिनो नियोज्यत्वात् उपनयीतेत्यनेनाचार्यकरणे विहिते नात्मनेपदेन नियोज्यविशेषणमाचार्यत्वं प्रतीयते नेन
ज॰ उपनयने यो नियोज्यः स एवाध्यापनेऽपि तयोरेकप्रयोगत्वात् एवं च समाचार्यकर्तृकमध्यापनं माणवककर्तृकेनाध्ययनेन विना न सिद्ध्यतीत्य-
ध्यापनविधिप्रयुक्तैवाध्ययनानुष्ठानसिद्धेर्न पृथगध्ययने विधिरभ्युपगन्तव्यः अयमाणं विधिवाक्यं तु नित्यानुवादत्वेनाप्युपपद्यते तेनोध्यय-
नविधिमुपजीव्य पूर्वपक्षस्य पूर्वोत्तरपक्षौ अन्यथा वर्णितौ यौ विषयसंशयौ स्तः नास्ति विप्रतिपत्तिः विचारशास्त्रं विषयः अवैधं वैधं वेति सं- यत्न
व॰ शयः तत्र वैधवादी प्रष्टव्यः विधेयमाचार्यकर्तृकमध्यापनं किं माणवकस्यार्थज्ञानमपि प्रयुङ्क्ते किं वा पाठमात्रं विषयो नापाठमात्रं नाद्यः अन्त-
रेणाप्यर्थज्ञानमध्यापनसिद्धेः पाठमात्रेण तु विचारस्य विषयो न सम्भवति आपाततः प्रतीतः सन्दिग्धोऽर्थो विषयः तथा सति यत्रार्थप्रतीतिरेव ना-
स्ति तत्र संदेहस्य का कथा निर्णयो विचारस्य फलं सोऽपि विषयवद्दुर्लभः अतो विषयप्रयोजनाभावाद्विचारशास्त्रं नारम्भणीयमिति पूर्वपक्षः
अत्रोच्यते मा नाम अध्यापनेनार्थावबोधः प्रयुज्यतां तथापि सांगवेदाध्यायिनो निगमनिरुक्तव्याकरणैर्मुख्यतन्त्रस्य पौरुषेयग्रन्थेष्विव वेदेऽप्यर्था- ख॰
वबोधः स्वत एव प्राप्नोति ननु यथा विषं भुङ्क्ष्वेत्यत्र प्रतीयमानोऽप्यर्थो न विवक्षितः तथा वेदार्थस्याविवक्षायां विषयाद्यभावस्तदवस्थ इति चेन्न ।
विवक्षाया अपनोदितुमशक्यत्वात् विषभोजनवाक्यस्याप्रतीतत्वेन बाधो मा भूदिति सुव्योऽर्थस्तत्र परित्यक्तः वेदे तत्कृत्वेन विवक्षा विवक्षितेवेदा- नापि
र्थे यत्र यत्र पुरुषस्य सन्देहः स सर्वोऽपि विचारशास्त्रस्य विषयः तन्निर्णयः प्रयोजनं ततोऽध्यापनविधिप्रयुक्तेनाध्ययनेनावगम्यमानस्यार्थस्य विचा-

व॰२

र्थत्वाद्विचारशास्त्रस्य वैधत्वं सिद्धम् ॥ द्वितीयाधिकरणं भट्टमतेनारचयति । विचारविषयो धर्मो लक्षणेन विवर्जितः मानेन चाप्यथोपेतस्ताभ्यामि
ति विचिन्त्यते १ लौकिकाकारहीनस्य तस्य किं नाम लक्षणम् मानशङ्कापि दूरे तु प्रत्यक्षाद्यप्रवर्तनात् २ चोदनागम्य आकारो ह्यर्थत्वे सति लक्षण
म् अत एव प्रमाणं च चोदनैवात्र नोक्तितः ३ । लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः अत एवाहुः मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणादिति स
प्र १ जातीयविजातीयव्यावर्तको लक्षणमतः कश्चिल्लोकसिद्ध आकारो लक्षणम् तेन च लक्षणेन लक्ष्ये वस्तुनि संभाविते तु दृष्टे जाताया प्रमायां तद्युक्तः प्रमा
णेन तदवगच्छति तद्यथा सास्नादिमती गौरित्युपक्रम्य च तथाविधं जीवेषु तल्लक्षणलक्षितं तं पदार्थमनिश्चयं गौरिति चक्षुषावगच्छति एवं च सत्य
तत्र १ लौकिकत्वाद्धर्मस्य नास्ति लक्षणं कुतः प्रमाणसंयोगः कथंचित्तदुपयोगेऽपि न तत्र प्रमाणसद्भावः शङ्कितुमपि शक्यः न तावदत्र प्रत्यक्षं क्रमते ध
भावा १ र्मस्य रूपादिरहितत्वात् अत एव व्याप्तिग्रहणाभावान्नानुमानं प्रत्यक्षानुमानमूलत्वा[illegible]मायथा नूमानं सङ्गतिपरः तेनानुमानाभावान्नागमोऽपि प्रवर्तते । तत्र
तस्माद्धर्मो लक्षणप्रमाणरहित इति प्राप्ते ब्रूमः माभूच्चक्षुरादिगम्यो लौकिक आकारस्तथापि चोदनागम्यः स्वर्गसाधनत्वादिलक्षण आकारोऽस्ति तेनार्थ फलं
त्वे सति चोदनागम्यो धर्म इति लक्षणं भवति अर्थो धर्म इत्युक्ते ब्राह्मणश्चैत्यवन्दनादौ ह्यतो दोषातिव्याप्तिः तद्व्यवच्छेदाय चोदनागम्य [illegible] इत्युक्तम् ताव
त्युक्ते विधिगम्यस्य नरकफलत्वेनानर्थरूपस्य श्येनाद्यभिचारकर्मण्यतिव्याप्तिः तद्व्यवच्छेदायार्थ इत्युक्तम् यद्यपि श्येनस्यापि शत्रुवधः फलं न तु नरकः तथा
पि शत्रुवधस्य नरकहेतुत्वात् तद्द्वारा श्येनोऽनर्थः ननु चैवमग्नीषोमीयपशुहिंसायामपि वधत्वेन नरकहेतुत्वं स्यादिति शङ्कनीयम् तस्याः क्रत्वङ्गत्वेन
क्रतुफलस्वर्गव्यतिरेकेण फलान्तराभावात् यतश्चोदनागम्यत्वे सत्यर्थत्वं धर्मलक्षणम् अत एव गम्यधर्मगमकं विधिवाक्यं प्रमाणं यद्यपि प्रत्यक्षा
नुमानयोरविषयो धर्मः तथापि प्रसिद्धपदसमभिव्याहारेण व्युत्पत्तिः संभवति तस्मात्प्रमाणलक्षणाभ्यामुपेतो धर्मः ॥ अस्मिन्नेवाधिकरणे गुरुमत
माह ॥ यद्वा जिज्ञास्यवेदार्थः किं मन्त्राद्यवबोधितः सिद्धार्थोऽथवा विध्येकगम्यः कार्यार्थ एव वा १ सिद्धेऽपि पुत्रजन्मादौ व्युत्पत्तेरुपपत्तितः मन्त्रादिग
म्यः सिद्धस्य वेदार्थत्वेऽपि कात्र क्षतिः २ हर्षहेतुत्वबद्धत्वेन व्युत्पत्तिः पुत्रजन्मनि दुर्लभा सुलभा कार्ये वेदार्थोऽतः स एव हि ३ ॥ अथातो धर्मजिज्ञा
सेत्यत्राथशब्देन कृत्स्नवेदाध्ययनानन्तर्यमुच्यते अतःशब्देन वेदस्याकृतत्वस्य विवक्षितार्थत्वादेर्हेतुः क्रियते भट्टमते वैरनाशस्वर्गयोर्निषिद्धानि

अ॰ मा॰
६

सिद्धत्वमेदात्स्वरूपेणाग्नीषोमयोर्वैश्वम्यम् प्राभाकरमते त्वालम्भस्यैवेयत्वात् निषेधशास्त्रस्य शेषेन स्यन्तकरणत्वेन विधिस्पर्शात् निषेधागोचरत्वेन
धर्मत्वमिति विवेकः ॥ उक्तप्रायहृदयानुसारेण धर्मशब्दोऽपि कार्यत्वं वेदार्थमाचष्टे ततः सूत्रे वेदार्थजिज्ञासा स्यादिति प्रतिज्ञा कृता तत्र संशयः किं मन्त्रार्थवा
दप्रतीतसिद्धार्थोऽपि वेदार्थो भवति किं वा विधिवाक्यप्रतीतः कार्यार्थ एव वेदार्थ इति तत्र लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति न्यायेन
मुख्यन्यायानुसारी वेदार्थो वर्णनीयः श्रुतत्वात् सिद्धार्थेऽप्यस्ति पुत्रस्ते जात इति वाक्याद्धर्षहेतुवाक्येन जन्यमानहर्षेण पुत्रोत्पत्तिकालादिलिङ्गेनानुमाय हर्षहे
तोः पुत्रजन्मनि संगतिं प्रतिपद्यते तस्मान्मन्त्रार्थवादप्रतीतोऽप्यर्थो वेदार्थ इति प्राप्ते ब्रूमः पुत्रजन्मवद्धर्षहेतोर्धनलाभादीनां बहुत्वात् अस्य वाक्य
स्य पुत्रजन्मैवार्थ इति निर्णयो दुर्लभः गामानयेति वाक्ये तु गवानयनरूपं मध्यमवृद्धप्रवृत्तिमवलोक्य सङ्गतिग्रहणं सुलभम् तस्मात्कार्यार्थ एव
वेदार्थ इति ॥ तस्य निमित्तपरीष्टिः इति तीयाधिकरणमारचयति । धर्मस्य ज्ञापकं मानं यदुक्तं चोदनालक्षणम् एतत्किं न परीक्ष्यं स्यात्किं वा समयकर्त्री
ष्यताम् १ मानोपदेशान्मयस्य सिद्धत्वात् किं परीक्षया मैवं विचारशास्त्रस्य सम्परीक्षोपेक्षते कुतः २ अत्रादौ परीक्ष्यो वेदार्थश्चोदनामानं तु शिवा वेदा
र्थस्य प्रधानत्वात्प्रथमे तत्परीक्षणम् ३ चोदनामानं तेनैवाप्रथमे साध्यतां गता अनपेक्षतया तस्याः ततो मुख्यत्वमाश्रितम् ४ ।। सङ्ग्रहार्थः अस्मिन्न
वाधिकरणे गुरुमतमाह द्वितीयाध्यायाद्येः कर्मभेदशेषशेषित्वादिरूपो वेदार्थः सूत्रकारेण परीक्षिष्यते चोदनाप्रामाण्यस्य तु प्रथमाध्यायेप
रीक्षा तदेतदयुक्तं कुतो वेदार्थस्य प्रधानत्वेनादौ परीक्षणीयत्वात् प्रधानभूतो हि वेदार्थः पुरुषार्थत्वेनानुष्ठेयत्वात् प्रमाणं तु तद्बोधनाय प्रवृत्तत्वे
न शेषत्वादप्रधानमिति प्राप्ते ब्रूमः अस्त्वनुष्ठानोपाधौ वेदार्थप्रमाणयोः प्रधानोपसर्जनभावः प्रमाणप्रमेयभावोपाधौ तु प्रमाणस्यैव मुख्यत्वं
निरपेक्षत्वात् न हि स्वतःप्रामाण्यवादिनां मते सापेक्षता प्रमाणस्यास्ति प्रमेयं तु सापेक्षं मानाधीनामेयसिद्धिरित्युक्तत्वात् तदेतन्मुख्यत्वमा
श्रित्य सूत्रकारः प्रमाणपरीक्षामेवादौ चकारेति युज्यते अप्राधान्यमाश्रित्य धर्मविचार एवादौ कस्मान्न कृतः अपरीक्षितेन प्रमाणेन धर्म
स्यासिद्धौ तद्विचारस्याप्रयासिद्धेः तदेवमधिकरणत्रयेऽनुत्पादनाय भाट्टप्राभाकरमतभेदप्रदर्शनपरः अप्ययप्रायेण भाट्टमतमेवोपन्यस्यते ॥ ॥
। सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ चतुर्थाधिकरणमारचयति ॥ प्रत्यक्षादि निरपे

तस्य धर्मस्य चोदना रूपा निमित्तलक्षणमाल क्षणं च लक्ष्यते =
भट्टमते ४

अप्रामाण्यविचारः ४

धर्म =
देवताभास =

चोदनायाः =

६

३ दंसूत्रं
सतां विन्द्रियाणां संप्रयोगे सति
दृश्यमाने

अविद्यमाने भावि विनिधर्मे प्रमाणं =

धगम्यते विधिनैव वा प्रत्यक्षादीनां प्रमाणत्वाल्के यद्धर्मोऽवभासिता १ वर्तमानैकविषयमक्षं धर्मस्तु भाव्यसौ अक्षमूलोऽनुमानादिस्तेन विध्येकमे
यता २ अबाधको बाधको वा न तावद्बाधको विधिः शक्तेरलौकिके धर्मे ग्रहणं दुर्घटं यतः ३ समभिव्याहृते धर्मे शक्तिग्रहणसंभवात् बोध
कस्य विधेर्मानत्वमनपेक्षतया स्थितम् ४ ॥ अत्र प्रमत्तं प्रत्यक्षादीनां प्रमाणत्वात् प्रमेयावभासकत्वेनाविवादं धर्मस्य प्रमेयः असन्दिग्धा
विपर्यस्तज्ञानत्वे सति बुध्यमानत्वात् घटादिवत् तस्मात्प्रत्यक्षादिभिरेवैष धर्मोऽवगम्यत इति प्राप्ते ब्रूमः धर्मस्य प्रमेयत्वेऽपि प्रत्यक्षयोग्यता
नास्ति प्रत्यक्षस्य वर्तमानमात्रविषयत्वात् धर्मस्तु भव्यस्तस्मात्प्रत्यक्षमविषयः तन्मूलानुमानादीनां केव कथा क्वचित्सम्यग्देशे गृहीते व्याप्त्यादौ पश्चाद
नुमानादीनां प्रवृत्तिः तस्माद्विधिनैव धर्मोऽवगम्यते ॥ (औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बा
अबोधकर दरायणस्यानपेक्षत्वात्) ॥ पंचमाधिकरणमारचयति यथा धर्मे प्रत्यक्षादीनां प्रामाण्यं नास्ति तथा विधेरपि नास्ति प्रामाण्यं शक्तिग्रहणपू
र्वकं हि प्रामाण्यमाप्तवाक्यस्य लोके दृष्टं शक्तिश्च लोकप्रसिद्धे गवादौ गृह्यते धर्मस्त्वलौकिकः अतस्तत्र शक्तिग्रहणं दुर्घटम् तस्माद्विधेरबोधक
त्वान्न धर्मे प्रामाण्यमिति प्राप्ते ब्रूमः यथा प्रभिन्ने कमलोदरे मधूनि मधुकरः पिबतीत्यत्र मधुकरपदार्थमजानान इतरपदानामर्थमवगम्य त
त्समभिव्याहारात् कमलमध्यगते मधुपानकर्तरि दृश्यमाने भ्रमरे मधुकरशब्दस्य संगतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते तथा कारीर्या वृष्टिकामो
यजेतेत्यत्र लोकप्रसिद्धार्थवृष्ट्यादिपदसमभिव्याहारादलौकिकभावनायां विधेः संगतिं गृहीत्वा विधिवाक्यार्थं पुरुषो बुध्यते तस्माद् बोधक
भावाद त्वलक्षणमप्रामाण्यं नास्ति न च संवादाप्रामाण्यमिति शङ्कनीयम् समनन्तरभाविप्रतिनियतदृष्टफले वृष्ट्यादौ संवादस्यापि संभवात् अनिय
तदृष्टफले चित्रायागादौ प्रतिनियतजन्मान्तरे फले ज्योतिष्टोमादौ च संवादः कथमिति चेदेवं तर्हि स्वतःप्रामाण्याभ्युपगमान्नास्ति क्वापि संवा
दापेक्षा तस्मादबोधकत्वसापेक्षत्वयोरप्रामाण्यकारणयोरभावाद्विधेः स्वतःसिद्धं धर्मे प्रामाण्यं नापह्नोतुं शक्यम् ॥ (कर्मैके तत्र दर्शनात्)
षष्ठाधिकरणमारचयति ॥ वृष्यादिरूपो यः शब्दः सो नित्यो यद्वा विनश्वरः अनित्यो वर्णरूपत्वाद्दर्शने जन्मोपलम्भनात् १ अबाधितप्रत्यभिज्ञाब
लाद्वर्णस्य नित्यता उच्चारणप्रयत्नेनाभिव्यज्यतेऽसौ न जन्यते २ । शब्दनित्यत्ववादिनो वैयाकरणास्तावदेवं मन्यन्ते वर्णसमूहरूपवर्णानन्तरमिद

नद्वृत्तानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् १ अनन्तोऽचावचनात्स्वर्थस्य तन्निमित्तत्वादिति सूत्रपाठः शास्त्रदीपिकायाम् =

न्या·मा·

मेकं पदमिति प्रत्ययो मानसप्रत्यक्षेणोत्पद्यते स च प्रत्ययस्य वर्णव्यतिरिक्तः कश्चित्स्फोटनामकः पदार्थो विषयः स च नित्यः स एव शब्दो न तु व
र्णा इति तदेतन्नैयायिकादयो न सहन्ते वर्णेष्वेव कार्यावच्छेदोपाधिना पदैकत्वबुद्धेरुपपत्तौ वर्णातिरिक्तस्फोटकल्पनानर्थिका तस्माद्वर्णानामेव
शब्दत्वं वर्णाश्च प्रतिपुरुषं प्रत्युच्चारणं च जन्मविनाशवन्त उपलभ्यन्ते तस्मादनित्यः शब्दः तस्य च कारणदोषसम्भवाद्विधेरप्रामाण्यमिति पूर्वप
क्षः । बहुभिः पुरुषैः प्रत्येकं बहुकृत्व उच्चरिते गोशब्दे त एवामी गकारादयो वर्णास्त एवाबाधितप्रत्यभिज्ञा जायते तद्बलान्नित्या वर्णाः न च वर्णानां
जन्माभावे तदुच्चारणप्रयत्नो व्यर्थ इति शङ्कनीयम् तस्य यत्नस्य व्यञ्जकत्वाङ्गीकारात् एवं सति पुरुषभेदेनोच्चारणभेदाच्च यथायोगमुदात्ता
दिभेदैः षड्जऋषभादिभेदैश्चोपेता ध्वनिविशेषानुत्पाद्यैव चरितार्था भविष्यन्ति तस्मान्नित्येषु शब्देषु कारणदोषाभावान्नास्त्यप्रामाण्यम् ॥ सप्त
माधिकरणमारचयति । वेदवाक्यमप्रमाणं स्यान्मानान्तरानपेक्षता एतत्संक्षिप्ततया मानान्तरवर्जनात् १ वेदेपि लोकवन्नैव वाक्यार्थे सङ्गतिः
पृथक् गृहीतत्वात्ततो वाक्यं प्रमाणं नैवमेवेत्यतः २ पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् ३ समाख्या
ध्यापकत्वेन वाक्यत्वं तु पराहतम् तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता ४ ॥ यद्यपि वर्णानां नित्यत्वादेकार्थावच्छेदकस्य पदस्यापि वर्णोद्भूत
यानित्यत्वाद्वर्णपदद्वारा वेदस्य कारणसापेक्षत्वं नास्ति तथाप्यग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिवाक्यस्य वाक्यार्थे सङ्गतिग्रहणमपेक्षितं ततो
नैरपेक्ष्याभावात्प्रामाण्यं नास्तीति प्राप्ते ब्रूमः लोके गामानयेत्यादिवृद्धप्रयोगेषु पदपदार्थयोरेव सङ्गतिर्गृह्यते वाक्यवाक्यार्थयोः सन्निधियोग्य
तावशात्स्वार्थप्रत्यायकत्वाविवादे तथा वेदवाक्यस्यापि प्रत्यायकत्वादनपेक्षत्वेन प्रामाण्यमविरुद्धम् । अष्टममधिकरणमारचयति काठ
काठकं कौथुमं तैत्तिरीयमित्यादिसमाख्यानानां हेतुविषयो लोके हि तत्प्रत्ययश्चैते तत्प्रोक्तमित्यस्मिन्नर्थे वर्तन्ते तथा व्यासेन प्रोक्तं
वैयासिकं भारतमित्यादौ विवक्षितपौरुषेयत्वं प्रतीयते किं च विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात्कालिदासादिवाक्यवदिति प्राप्ते ब्रूमः अध्य
यनसंप्रदायप्रवर्तकत्वेन समाख्योपपद्यते कालिदासादिग्रन्थेषु तत्तत्सर्गावसाने कर्तार उपलभ्यन्ते तथा वेदस्यापि पौरुषेयत्वे तत्कर्ता
पलभ्येत न चोपलभ्यते अतो वाक्यत्वहेतुः प्रतिकूलतर्कपराहतः तस्मादपौरुषेयो वेदः तथा सति पुरुषबुद्धिदोषकृतस्याप्रामाण्यस्याना

पूर्वपक्षसूत्रं वेदांश्चैके संनिकर्षं पुरुषाख्या सिद्धान्तसूत्रं
उक्तं तु शब्दपूर्वत्वमाख्याः प्रवचनात् =

शाहः शाकुनमध्ययनं सर्वपुरुषाणामध्ययनमध्ययनान्तरसापेक्षं न तत्स्वातन्त्र्येण
प्रथमाध्येतास्ति आख्या समाख्या अतिशयेन वक्ता काठकः न तु कर्ता

पौरुषेयमिति

पूर्वपक्षः आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः = २
सिद्धान्तः
१ काम्यपशुकाण्डे विध्यर्थवादोच्यते वायव्यं श्वेतमालभेत भूतिकाम इति विधिः = ३
मानत्वात् विधेये = २

शङ्कनीयत्वाद्विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थितम् ॥ ॥ इति माधवीये जैमिनिन्यायमालाविस्तरे प्रथमस्याध्यायस्य प्रथमः पादः १ ॥
द्वितीयस्य पादस्य प्रथमाधिकरणमारचयति वायुर्वा इत्येवमादेरर्थवादस्य मानता न विद्यते यदि धर्मे किं किं वास्तोत्र विद्यते १ विध्यर्थ-
वादशब्दानां मिथोपेक्षापरित्यागात् नास्त्येकवाक्यता धर्मे प्रामाण्यसंभवे कुतः २ विध्यर्थवादयोः साकाङ्क्षा प्राशस्त्यपुरुषार्थयोः तेनैकवाक्यता
यजमानः
तस्माद्वादानां धर्ममानता ३ वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यर्थवादः तत्र विधिवाक्यगता-

वाविशिष्टमर्थं वि-
दधत्यर्थवादश-
ब्दाश्च विधिनैरपे-
क्ष्येणेव ३ ५
नायव्यादिशब्दा अर्थवादशब्दैर्नैरपेक्ष्येणैव भूतार्थमन्वाचक्षते क्षिप्रगामी वायुः स्वोचितेन भागेन तोषितो भागप्रदाय स्वयं प्रयच्छतीत्येते-
षामायणभारता दाविवक्षान्तः कश्चित्प्रतीयते न तत्र द्वैयं किंचित् अनपेक्षवाक्यताभावात्तस्यार्थवादस्य धर्मे प्रामाण्यमिति प्राप्ते ब्रूमः मा
भूत्पदैकवाक्यता वाक्यैकवाक्यता न विद्यते विधिवाक्यं तावत्पुरुषं प्रेरयितुं विधेयस्यार्थस्य प्राशस्त्यमपेक्षते अर्थवादवाक्यं च फलवदर्थावबो-
धपर्यवसितमप्ययनविधिपरिगृहीतत्वेन पुरुषार्थमपेक्षते ततः पुरुषार्थपर्यवसितविध्यपेक्षितप्राशस्त्यं लक्षणया समर्पयदर्थवादवा-
क्यं विधिवाक्येन सहैकवाक्यतामापद्यते यतः क्षिप्रगामिस्वभावतया शीघ्रफलप्रदो वायुरस्य पशोर्देवता ततः प्रशस्तमिदं वायव्यपशुमाल-
भेतेति वाक्ययोरन्वयस्तस्मादर्थवादो धर्मे प्रमाणम् ॥ अस्मिन्नेवाधिकरणे मतान्तरमनुसृत्य वर्णकान्तरमुपन्यस्यति वादो क्षेत्रपेक्षत्वान्न विधेर्मानते-
ति चेन्न सम्बन्धेन नित्यत्वाद्वारा नापेक्षेतेति गुरुर्जगौ १ ऊर्जेवरुध्या इत्येष विधिवन्निगदोऽनकिम् यूपो उदुम्बरतां सोऽतिस्तो नित्यतानद्विधित्सया १ चतु-
र्थ्या फलता लाभाद्यूपोदुम्बरताफलम् ऊर्जोवरोधं कथं नेकं चेत्स्तुतिपरो भवेत् २ अस्त्वौदुम्बरतस्त्वाविधानात्कस्य तत्फलम् अर्थं हेवा-
क्यभेदस्तेन स्तावकएव सः ३। यतो वायुः क्षिप्र एवफलप्रदः अतो वायव्यमालभेतेत्येवमर्थवादोक्तदेवतामपेक्ष्य विधिः पुरुषं नियुङ्क्ते ततः सापे-
पेत ४ क्षत्वाद्प्रामाण्यमिति पूर्वः पक्षः विमतं कर्मान्वेषणीयं फलप्रदं देवतोऽत्वात् राजसेवावदित्यनुमानेन यदर्थवादे विवक्ष्यते तदानीमागमप्रमाण-
स्य विधिवाक्यस्य मानान्तरसापेक्षत्वं स्यान्न त्वेवं विवक्षिते किं तु फलप्रददेवतालोचकत्वोपन्यासमुखेन कर्मप्राशस्त्यमुपलक्ष्यते तथा सति प्रश-
स्तकर्मानुष्ठेयमित्यस्मिन्नर्थे सार्थवादस्य विधेः पर्यवसानादेकवाक्यता लभ्यते तत्र कुतः सापेक्षत्वं तस्माद्विधिः प्रमाणमिति सिद्धान्तः ॥ द्वि

उदुम्बरऊर्क्सारभूतोऽन्नरसोऽमृताख्यः फलद्वारेण पशवो पूर्कमां सत्वीरादिद्वारा गैदुम्बरे यूपे पशोर्नियोजनाः धर्मूर्ध्व पञ्चायोजोकत्वा ऊर्गूपान्त-
सन्नस्मै यजमानाय तदर्थमाप्नोति अतो यूपो दुम्बरतां... १

विधिर्नास्त्यदर्थवन्नाह्लादमात्रे ह्यनर्थकम् =

रू=२ ओं॰२

ऊर्जो वरुध्या इति

अ॰मा॰ ८ तीयाधिकरणमारचयति, इदमाम्नायते औदुम्बरो यूपो भवतीत्यर्थ्युदुम्बरः ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोवरुध्या इति अत्र तत्र शङ्काभि
धेयो त्वन्नसारभूतः रसस्तो न रसरूपिणीत्युच्यते औदुम्बरो यूपो योर्जमानार्थमध्वर्युः पशुरूपामूर्जमाप्नोतीति ततो यूपस्यौदुम्बरत्वमूर्जः संपादनाय
भवतीत्यर्थः अत्रावरुध्या इति तादर्थ्ये चतुर्थी तया फलत्वं गम्यते यजमानलाभाय राजसेवेत्यादौ तथा दर्शनात् न च फलपरस्य वचनस्य स्तावक
मापि॰८ त्वं युक्तम् अन्यथा स्वर्गकामस्य [illegible] ज्योतिष्टोमस्तावकत्वप्रसङ्गात् इति प्राप्तेऽब्रूमः अयमूर्जोवरो[illegible]धस्य फलस्यास्ति किमर्थं विहि ५ः
तस्यौदुम्बरत्वस्यानविहितस्य नाद्यः अनुष्ठानमन्तरेण द्रव्यमात्रात्फलानुत्पत्तेः द्वितीये किमत्र विधिः प्रत्यक्षो ऽनुमेयो वा नाद्यः औदुम्बरो यूपो
स्तुता॰८ भवतीत्यत्र लिङ्प्रत्ययाश्रवणात् द्वितीयेऽस्तु अनेयः न चात्र स्तुतिमङ्गीकरोषि अपौचेत विधानाय यदौदुम्बरत्वं तत्प्रयते तत्फलं चावबोधयत इ
ति तर्हि वाक्यं भिद्येत ततः फलविधिवन्निगद्यमानमप्येतद्वाक्यं स्तावकमेव ॥ अस्मिन्नेवाधिकरणे मतान्तरेणानुसारेण पूर्वोत्तरपक्षावाह अप्नो
दर्थादिभिः= तीति विधित्वस्य वादत्वस्याप्यनिर्णयात् न प्रमा चोदने तत्त्वं वादो ह्येकवाक्यतः १ तेन ह्यन्नमिति प्रोक्तो वादो हेतुरुत स्तुतिः हिनाम्नाद
नाप्नोतेः मा॰ त्वतांतः श्रपाद्यन्नं च साधनम् २ अर्पसाधनताप्नोतीत्येतेः सा कं विकल्पते अतो निरर्थको हेतुः स्तुतिः स्तत्यात्म वार्तिका ३ मन्त्रावरुध्ययत्येतिकि
म हेत्वेके हेतवः यागे भूतघ्रो ऽशप्रथनादेश्च भासकाः ४ ब्राह्मणेनापितज्ज्ञानान्मन्त्राः प्रत्येकहेतवः नतेष्ठीने सह त्वाहुर्वरमस्तुतः ५॥
ऊर्जं पशूनाप्नोतीत्येतस्याप्नर्वार्थत्वाद्विधित्वं प्रतिभासते लिङाद्यभावादर्थवादत्वम् अतः सन्दिग्धत्वान्नप्रमाणं चोदना या इति पूर्वः पक्षः ए
8 कवाक्यत्वलाभात् तेनार्थवादत्वं निर्णीयते ततः प्रमाणं चोदनेति सिद्धान्तः । तृतीयाधिकरणमारचयति इदमाम्नायते अर्पणञ्जुहोतीति
न ह्यन्नं क्रियत इति अयमर्थवादो विधेयेऽर्पे हेतुर्नेतानेति दि[illegible]शा हेत्वहेतवा विशह्यत्वात् यस्मादन्नसाधनं तस्माद्धूर्पेण होतव्यमित्य
र्थे यद्यदन्नसाधनं दर्विपिठरादिकं तेन सर्वेण होतव्यमिति लभ्यते ततः पिठरादयः अर्पेण सह विकल्पन्त इति प्राप्ते ऽब्रूमः अर्पस्येवान्नसा
धनत्वं श्रौतेतत्तृतीययात दवगमात् पिठरादीनां चानुमानिकमेतो ऽसमानबलत्वान्न विकल्पो युक्तः न तो हेतुरर्थः स्तुतिः प्ररोचनाया युक्ता
तस्मात्स्तुतिवेनान्वयः १२४ । उरु प्रथस्वेत्ययं कश्चिन्मन्त्रः तस्यायमर्थः भोः पुरोडाश त्वमुरु विपुलं प्रथा भवति तथा प्रसरेति एवमादयो मं

चतुर्थाधिकरणमारचयति मंत्रा इति मन्त्रब्राह्मणायोर्थहाकलहो विनियोजने नं मंत्रलिङ्गसिद्धार्थमन्त्रवक्री तरद्यतः १

तदर्थशास्त्रात् गतोर्थवादत्वप्रसंगः मंत्रेषु [illegible] इति॥

एवमादयो मन्त्रा वाक्यप्रतियोगिनो विधिप्रतियोगिनश्चार्थ वादा विधादिभिः इदा नीं देवतप्रतियोगिनो [illegible] हेतुविध्यर्थवाद [illegible] नेन ह्यन्नमिति ५

मंत्रब्राह्मणयोर्यद्वाक्यलक्षणविनियोजने न मंत्रलिंगसिद्धार्थमनुवक्ष्यमाणं

उच्चारणमात्रेण तदर्थप्रकाशनं

अनुवादार्थः

२२

मंत्राणां प्रयोगे उच्चार्यमाणानामदृष्टमेवं जनयंतीति न त्वर्थप्रकाशनाय तदुच्चारणं पुरोडाशप्रथनलक्षणार्थस्य ब्राह्म
णवाक्येनापि भासमानात् उरु प्रथस्वेति पुरोडाशं प्रथयतीति हि ब्राह्मणवाक्येन युक्तं अर्थप्रत्यायनस्य दृष्ट प्रयो
जनस्य संभवे सति केवलादृष्टस्य कल्पयितुमशक्यत्वात् तस्माद्दृष्टमर्थानुस्मरणमेव यागप्रयोगे मंत्रोच्चारणस्य
प्रयोजनं ब्राह्मणवाक्येनाप्यर्थानुस्मरणसंभवे मंत्रेणैवानुस्मरणीयमिति यो नियमस्तस्यादृष्टं संभवाद दृष्ट
प्रयोजनमस्तु प्रथमे वाधिकरणे मनंतरे गार्हपत्यवाद्दृष्टस्य मंत्रस्य लिंगेन विनियोगे ब्राह्मणवाक्यस्य वि
वक्षितार्थस्याद्वाक्येन विनियोगे मंत्रलिंगेन विवक्षितेति तु भयोर्विरोधात् प्रामाण्ये चोदनायाः इतिपूर्वः पक्षः ना
यं विरोधः प्रबलेन लिंगेन विनियोगसिद्धौ वाक्यस्यानुवादकत्वादिति सिद्धांतः इतिमाधवीये जैमिनिन्याय
मालाविस्तरे प्रथमाध्यायस्य द्वितीयः पादः ॥ २ ॥ अष्टकादिस्मृतेर्धर्मे न मानं मानता यथवा निर्मूलत्वान्न मानं स्याद्वेदार्थौ कौ
निरर्थना २ वैदिकैः स्मर्यमाणत्वात् स्मर्तृणां वेदमूलता विप्रकीर्णार्थसंक्षेपात्स्यार्थत्वाद् स्मिमानता ३ नत्वास्मा
कां गताग्नीजना इति मेत्रीः नन्वस्मृतेर्वेदमूलैर्नुमितेमानत्वसंभवात् ४ ॥ तृतीयपादे प्रथमाधिकरणमारचयति अ
ष्टकाः कर्तव्या इत्यादि स्मृति वाक्यं न धर्मे प्रमाणं लौकिकरूपवाक्यवत् सति मूलप्रमाणरहितत्वात् विप्रलंभकवाक्यवत्
यदि मूलप्रमाणत्वाय वेदार्थ एव स्मर्तेति मन्येथास्तर्हि वेदे नैव तदर्थस्यावगतत्वादियं स्मृतिर्व्यर्था स्यात्तदानीम
नुवादकत्वात् प्रमाण्यमिति प्राप्ते ब्रूमः विमतास्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात् उपनयनाध्ययना
दिस्मृतिवत् न च वैयर्थ्यं कनीयस्य स्मर्तादीनां प्रत्यक्षे पठितेष्वचवेदप्रकीर्णस्याविद्याय संस्कृतक संक्षिप्यमा

मंत्रब्राह्मणयो
...

(left margin:) मंत्रलिंगप्रयोगसमेतमर्थस्मारकत्वं
प्रयोगेष्वप्रयोजनम् नियमो वेदादृष्टमेव

यो जनाः प्रतिनंदंति
त्रिंधेत्रमित्राय मी संवत्स
रस्यपत्नी सा नो अस्तुम
मंगला

तिमिस्त्वा,

(right margin:) धर्मप्रमाणसूत्रस्मृतिः स्मृतिसमाचारश्च प्रमाणाः

१२

तस्मादतोम^

अ· क·
मा·

णत्वात् तस्मादियं स्मृतिर्द्वेमे प्रमाणं अस्मिन्नेवाधिकरणे मतान्तरेण पूर्वोत्तरपक्षावाह योजनमाः प्रतिनंदन्तीत्ययं मन्त्रो ४
काष्ठाउसंगेन स्पर्शाउं स्मार्तमेव नेदि स्मृतं न स्मृतिनिपादकवेदवाक्यमुपलभामहे तस्मादिदं वेदवाक्यं धर्मे प्र
माणं न भवतीति तत्र तन्त्रं न मूलं स्मृतिवेदस्यानुमेयत्वात् अनुमानं च दर्शितं तेनाधर्मे प्रमाणं ५३२ औदुम्बरीवेष्ट
नीया सर्वेत्यस्याः स्मृतेर्मितिः अस्मिन्नेवेति नारदेत्यमिति स्यात् एकादिवत् १ औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षवेदतः द^
विरोधान्मूलवेदस्यानुमानादस्मानुता २ प्रत्यक्षानुमितश्रुत्योः ये हाथ्याख्यानदर्शनात् अप्रमात्वे शाकितेवा
धौनेमानसर्वत्रुवर्णपते ३ परश्रन्यवेदाश्च मूलं चेद्दुष्टेनस्यतेन अविरमप्यनुष्ठानं स्वश्रन्यहानुरोधतः ४ (
वैसर्जनाख्यहोमीयवाससो ग्रहणस्मृतिः प्रमाणत्वाश्रुत्याबाधात्प्रमाणं स्यादुक्तादिवत् दृष्टलोभैकमूलत्व
संभवे श्रुत्यकल्पनात् सर्ववेष्टनवद्दृष्टार्थहीनापरपक्षतिर्प्रमा ६ विरोधेत्वनपेक्षं स्यादसति ह्यनुमानमु हितनी
याधिकरणमारचयति ज्योतिष्टोमे सद्योनामक साम उपस्थमध्ये काचिदौदुम्बरी शाखा निखन्यते तस्याश्च वाससा
वेष्टनं स्मर्यते औदुम्बरी सर्वा वेष्टयितव्येति सा स्मृतिः प्रमाणमष्टकादिस्मृतिवद्विमूलवेदस्यानुमानं शक्यत्वात् ६ एवंन्यायेन प्रमाणमिति विकल्पः
प्रा तिवत्प्रमः औदुम्बरीं स्पृष्ट्वोद्गायेदित्यनेन प्रत्यक्षवेदवचनेन स्पर्शो विधीयते न च सर्ववेष्टने स्पर्शः संभवतीति
अतो मूलवेदानुमानं कालात्ययापदिष्टं [बाधितं] तस्माद्धि प्रलंभकवाक्यवत् निर्मूला स्मृतिरप्रमाणं अस्मिन्नेवाधिक
रणे मतान्तरमाह स्पर्शसर्ववेष्टे न विषययोः प्रत्यक्षानुमितश्रुत्योः परस्परविरोधादुभयोरपि अप्रामाण्यमिति
पूर्वपक्षः प्रत्यक्षमानस्य कालात्ययापदिष्टत्वेपि तद्ध्रुत्वाभावेस्य मर्षश्रुतिः स्वार्थे प्रमाणं यदि ७

स्यान्नरश्रुत्यप्रत्यक्षवेदः सर्ववेष्टनस्मृतेर्मूलमित्युच्यते तत हि मा भूत्तस्याः प्रामाण्यं तथापि परप्रत्यक्षात्प्रत्यक्षत्वस्याभा
नहि तत्त्वेन स्पर्शनं वा चानुष्ठेयो नतु सर्ववेष्टने ॥ ३ ॥ ज्योतिष्टोमे अग्निषोमीयपशौ स्ले वै प्रक्रान्ते वैसर्जनहोमो
विहितस्तत्र यजमानं [redacted] पत्नीपुत्रानुग्रातः स्याहते नवास सा प्रच्छाद्य वाससीं तेस्कन्दं उपनिबध्य जुहोति तस्मि
न्नाम स्वे वं स्मर्यते वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीति सैषा स्मृतिः सर्ववेष्टनस्मृतिवत्प्रत्यक्षश्रुत्या न
बाध्यते तत्तत्र लोभादिकारणस्मृतिवन्मूलवेदानुमापनेन प्रमाणमिति प्राप्ते ब्रूमः कदाचित्कश्चिदध्वर्युर्लोभाद्वे
नहासोऽजग्राह तन्मूलैवैषा स्मृतिरित्यपि कल्पना संभवति दक्षिणानुसारेणैव चेयं कल्पना दक्षिणायां परिक्री
लोभमूलत्वेन = तानामृत्विजां लोभदर्शनात् तथा सत्यस्याः स्मृतेरन्यथाप्युपपन्नत्वात् लोभादिकारणस्मृतिवन्मूलश्रुतिकल्प
यितुं शक्यते बाधाभावेऽपि तन्मूलवेदाभावान्नेयं स्मृतिः प्रमाणम् आचान्तेनैव मित्यमामावास्मृतिरेषा न मा
भवेत् वेदकृत्वे नियमः श्रौतः क्रमस्तेन विरोधतः १ आचान्तादिः पदार्थोऽत्र क्रमो धर्मः पदार्थगः धर्मस्य ध
र्मितत्वात् बाधादक्षिमानता २ शाक्या क्वाहि सानं धर्मी न बाधमेस्तु तत्त्वतः न धर्मानहिमत सत्यां होत्रीयं श्व
हेतोष्वपि ३ सदाचारः प्रमाणाभावान्निमित्तत्वात् मानता लुप्तकादिवैन स्पर्शमूलत्वात् प्रमाणता ४ ॥ ॥
तत्र योधिकरणभाष्यकारमतेनारचयति तत्राचामेदिति विहितं पुरुषार्थमाचमनं यदानुष्ठानमध्येत
तादिनिमित्तेषाश्रेणि तदा नैमित्तिकमाचमनं क्रतुगत्वेन स्मृत्या विधीयते आचान्तेन कर्तव्यमिति सेयं स्मृ
तिर्नैव प्रमाणं कुतः विरुद्धत्वात् वेदं कृत्वा वेदिं करोतीति श्रुतौ क्वालवाचिना क्त्वाप्रत्ययेन क्रमः प्र

शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रप्रमाणत्वात् अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् तेषु दर्शनाद्विरोधस्य च

२८ तीय नैवेदोन्मादर्थमयं सम्प्राप्ते न साधनं वेदितव्यं बलीयस्त्वं यत्र मध्यवर्तिनी चतत्रे गलग्रोतान्भूमिः मयो मेधेय
दिलमादिनिमित्तमाचमनं कर्तव्यमित्याकृतज्ञैर्नैरन्तर्येण विरुध्येत तस्माद्धेतुमत्स्मृतिवदाचमनस्मृतिरप्रमाण
मिति प्राप्ते ब्रूमः वेदवद्दृश्यमानकर्तृकपदार्थवत् आचमनादयः स्मृतिकपदार्था अनुष्ठेयाः कर्तृमन्त्रपदार्थानिरोध तुक्षेयं
मेः सर्वपदार्थानुपजीव्याति तत्तदुपजीव्यविरोधाभावे मध्ये बवाधृते तन्त्रकर्मेणाचमनबाधाप्तिः तस्मादियं स्मृतिः
प्रमाणं अस्मिन्नेवाधिकरणे वार्तिककारः प्रकारान्तरेण विचारं ह्ययं चकार तत्र प्रथममविचारं दर्शयति ब्रह्मच
र्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन रक्षन्निति श्रुतावहिंसादिधर्मत्वेनोक्ताः स एव धर्मः शाक्यैनाप्युक्तः तस्मा
च्छाक्यस्मृतिर्धर्मे प्रमाणमिति चेन्न स्वरूपेण धर्मस्याप्यहिंसादेरन्यायेन शाक्यसंबन्धेन सत्यधर्मत्वप्रसंगात् तद्दीयथ
येनाहिंसादिनोपवर्णितत्वात् तस्मात् स्मृतिर्धर्मे प्रमाणं विचारान्तरं दर्शयति होलाकोत्सवादि मूलमूल सदाचारस्य
वेदाभावादप्रमाणमिति चेन्न वैदिकैः शिष्टैः परिगृहीतत्वेनाष्टकादिस्मृतिवद्वेदमूलत्वात् तत एव मन्वादिभि
ग्रन्थगौरवभयाद्विशेषाकारेणानुपदिष्टोऽपि सदाचारः सामान्याकारेणोपदिष्टः श्रुतिस्मृतिः सदाचार इत्ये
वं धर्मे प्रमाणं प्रत्यासात् तस्माच्छिष्टाचारः प्रमाणं यवादिशब्दाः किमार्याणामोवाच्ये म्लेच्छ साम्प्रतः दी
बहुवचनम् = र्घशूकप्रियंग्वाद्याहुर्यवादौ विकल्पतः २ यज्ञान्याद्रतिशास्त्रस्थप्रसिद्धिहि बलीयसी शास्त्रीय
धर्मे तेनात्र प्रियंग्वादिर्न गृह्यते ३ ४ ५ ४ ४ ४ पञ्चमाधिकरणमारचयति यवमयश्चरुर्भ
वतीत्यादौ हीडपानसताम् पश्चात्ते इति श्रूयते तत्र यवशब्दमार्या दीर्घशूके प्रयुंजते वराहशब्दं च सूकरे म्लेच्छा

समा विप्रतिपत्तिः स्यात् =

ध्व

त्वयवशब्दं प्रियंगुष्वनार्यान्प्रति शब्दं कुलस्वाम्यज्ञानेनोत्पत्त्या सति लोकव्यवहारेण निश्चितत्वे छब्दार्थेषु आर्यम्लेच्छप्रसिद्ध्योः समानबल
त्वात् उभयविधार्थप्राप्त्या विकल्पेन स्वीकार्यत्वे इति प्राप्ते ब्रूमः शास्त्रीयधर्मावबोधस्य शास्त्रप्रसिद्धिर्बलीयसी प्रत्यासन्न
त्वाद् विच्छिन्नपारंपर्यागतत्वाच्च शास्त्रे च यववराहविध्यर्थवादे एवं श्रूयते यत्रान्या ओषधयो म्लायन्तेऽथैते मोदमाना इवो
त्तिष्ठन्तीति वृत्तौ दृष्टिना शाकाले भिद्यमाना दीर्घशूकेषु दृश्यन्ते ननु प्रियंगुष्वपि तेषामिति तत्रैषधिपरिपाकात्पूर्वं तेषां तुग
मानत्वात् उपानहि धर्मार्थवादस्यैव भवति वराहं गावोऽनुधावन्तीति गवाम् अनुधावनं शूकरे संभवति न कृष्णशकुनौ
दि तस्मादीर्घशूकादिर्थवाक्यशेषात् शास्त्रार्थः अत्र वार्त्तिककारः पीलुशब्दम्रुदाजहार नेच म्लेच्छा हस्तिनि प्रयुंजते आर्या वृक्षस्तु
वृक्षेत न ज्ञाविस्तुत व्यवहारस्यार्येष्वेव संभवात् तत एव पीलुशब्दार्थः एवात्र यानिर्णयेन तद्वाक्येन प्रमेति चेन्न न
शास्त्रस्य बलित्वेन तत्त्वासिद्धार्थनिर्णयात् १ यामातलविवाहादौ शिष्टाचारः समानबाऽइतराचारवन्मातुलसमाव
स्मार्तेबाधनात् २ स्मृतिमूलो हि सर्वत्र शिष्टाचारस्ततोऽत्र च अनुमेया स्मृतिः स्मृत्या बाधप्रत्यक्षयानया ३ १
यवादीनि अस्मिन्नेवाधिकरणे गुरुमतमाह स्पष्टोऽर्थः अस्मिन्नेवाधिकरणे वार्त्तिककारमतेन वर्णकान्तरमारचयन्ति केषुचिद्देशे यइति
षु दृश्यमानत्वे मातुलस्य दुहितरं शिष्टाः परिणयन्तीति सोऽयमाचारः प्रमाणं शिष्टाचारत्वाद्धोलाकाद्याचारवदिति चेन्न स्मृ
त्वेन तिविरुद्धः कालात्ययापदिष्टत्वात् तथा च स्मृतिः मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च समानप्रवरां चैव त्यक्त्वा चा
ञ्द्रायणं चरेदिति नव स्मृत्याचारयोर्मूलवेदानुमापकत्वसाम्यात् समबलत्वमिति शंकनीयं होलाकादि सदाचारस्य
मन्वादिस्मृतिवद्वेदानुमापकत्वायोगात् नावलिप्तदानीतनाः शिष्टा मन्वादिवद्देशकालविप्रकृष्टवेदं दिव्य

ज्ञानेन साक्षात्कर्तुं शक्यत्वे तिर्यन्न शिष्टाचारो मूलं वेदमनुमापयेत् शङ्क्येत न यः कोऽपि शिष्टो यत्र क्वापि देशविशेषका-
लविशेषे च यं कंचिदपि होलाकाद्याचारस्य मूलभूतं स्मृतिग्रन्थं सकललोकविदितं न स्मरति शिष्टाचारेण स्मृतिरेवानुमातुं शक्यते
न तु श्रुतिः अनुमिता च स्मृतिर्विरुद्धया प्रत्यक्षस्मृत्या बाध्यते अत एवाहुः आचारात् स्मृतिं ज्ञात्वा स्मृतेश्च श्रुति-
कल्पनं तेन तद्व्यतिरिक्तं तेषां प्रामाण्यं विप्रकृष्यत इति तस्मादप्रामाण्यमीदृशस्याचारस्याश्रयेयं लौकिको वाक्य-
गो वार्थः सिद्धत्वादेः समर्थनतः उभौ विधार्थवादैकवाक्यत्वादस्मिन्नितिमः १ कल्प्यः पिकादिशब्दार्थो याज्ञो वा म्लेच्छप्रसि-
तः कल्प्यो ह्यार्यप्रसिद्धत्वादनार्याणामनादरात् २ ग्राह्या म्लेच्छप्रसिद्धिश्चाविरोधात् पिकनेमादि-
शब्दानां कोकिलाद्यर्थता ततः ३ तथैव परवर्णकमारचयति त्रिवृद्बहिः पवमानमिति अत्र त्रिवृत्त्वं स्तोत्रगणे
लोकसिद्धोऽर्थः वाक्यशेषात् ऋक्त्रयात्मके तृचि त्रिवृत्स्तोमे प्रवर्त्तमानानां बहिष्पवमाननामकस्तोत्रनिष्पादनत्वमाण उपा-
स्मै गायता नर इत्यादीनामृचां नवकमित्यर्थः तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि पदार्थनिर्णये लोकवेदयोः स-
मानबलत्वात् भावार्थो विकल्पेन गृहीतव्याविति चेन्मैवं लौकिकार्थस्वीकारपक्षे विधिवाक्ये त्रैगुण्यमर्थवाद- ऽर्थः
नोदितं तु वशनी यत्नाविरोधा स्त्रमाणेन = वाक्ये स्तोत्रीयाणां ऋचां नवकमित्येवं विधार्थवादवाक्ययोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात् तदेकवाक्यत्वा-
य स्तोत्रीयानवकमेव विधिवाक्ये नियतोऽर्थः षष्ठाधिकरणमाचष्टेति आर्याः पिकादिशब्दानामप्रसिद्धेऽर्थे प्रयु- ऊह
ञ्जते स्वेच्छया स्वप्रमाणभूताः तस्मान्निगमनिरुक्तव्याकरणैः पिकनेमादिशब्दानामर्थाः कल्पनीया इति चेन्मैवं ११
आर्यप्रसिद्धिविरोधस्याभावेन तद्विषये म्लेच्छप्रसिद्धेरपि आदरणीयत्वात् कल्प्यमानादव्यवस्थितादर्थात्

पिकादिशब्देषु =

घ
अपौरुषेयाइति श्लोकांते योज्यः

रं व्यवस्थितास्ते म्लेच्छश्रुतिः यच्चेदं श्या इतेस्य भावस्माच्च निरुक्तादयश्च विनार्थाः तस्मादनार्थे प्रसिद्ध्या पिकः कोकिलः नेम
शब्दोर्द्धवाचीतामरसशब्दः पद्मवाचीत्येवं इत्येवं तामरसं ... अर्थो बोधाद प्रमाणं पिकालम्भनचोदना
मैवं म्लेच्छप्रसिद्ध्यापि तद्बोधाद्विरुद्धया १ अपौरुषेयाः कल्पाद्याः कृत्रिमा वा न कृत्रिमाः श्रुतिस्मृत्यादौ मे ग्रहेः
स्वतो मानत्वयुक्तः स्मृतं २ प्रत्यक्षमोलैः पौरुषेयाः एकावकास मतत्वतः तत्रापलेभिरे केचिदापस्तंबादिकर्तृता ३
कल्पसर्वेति यो दर्शीकार्यतोक्तेः श्रुतिनेमा न कल्पसाध्यवेदत्वग्रहणं दुर्बलत्वतः ४ अस्मिन्नेवाधिकरणे गुरु
मतमाह स्वप्नोक्तैः सप्तमाधिकरणमारचयति बोधायनापस्तंबाश्वलायनकात्यायनादिनामांकिताः क
ल्पसूत्रग्रंथा निगमनिरुक्तादिषडंगग्रंथाः मन्वादिस्मृतयश्चापौरुषेयाः धर्मबुद्धिजनकत्वात् वेदवत् न
च मूलप्रमाणसापेक्षत्वेन वेदवैषम्यमिति शंकनीयम् उत्सन्नाचाराश्रुतेः स्वतःप्रामाण्यांगीकारेण निरपेक्षत्वा
त मैवं उक्तानुमानस्य कालात्ययापदिष्टत्वात् बौधायनसूत्रमापस्तंबसूत्रमित्येवं पुरुषनाम्नाते ग्रंथा उच्यंते
न च काठककादिसमाख्यावत्प्रवचननिमित्तत्वमुक्तं तत्र ग्रंथनिर्माणकाले तदानींतनैः कैश्चिदुपलब्धत्वात् न चाथवि
च्छिन्नपारंपर्येणानुवर्तते ततः कालिदासादिग्रंथवत्पौरुषेयाः तथापि वेदमूलत्वात्प्रमाणं अस्मिन्नेवाधिकर
णे गुरुमतमाह सर्वेति यो दर्शपौर्णमासकर्ता कल्पसूत्रकारस्त्वाह सर्वेभ्यस्तिथिषु मावास्याकर्तव्येति श्रुतिस्त्वमा
वास्यायामेव तिथौ तत्कर्तव्यतामाह ततः कल्पसूत्रैर्बाधवेदनविरोधादियं श्रुतिर्नेमास्यादिति चेन्नैवं कल्पस्य वेद
त्वेनाप्यसिद्धं किंतु यत्नेन साधनीयं न च तत्साधयितुं शक्यं पौरुषेयत्वस्य समाख्यया तत्कर्तृरुपलंभेन च

प्रयोगपरत्व
मिति चेन्न
मूर्द्धेति

अ॰क॰मा॰
सि॰प्रांः १६

12

साधितत्वात् अतः कल्पसूत्रस्यापि बलवत्तया न स्मृतेरप्रामाण्यं ॥ १३ ॥ होलाकादेर्व्यवस्थासाधारण्यमुक्ताग्रिमः देश
भेदेन दृष्टत्वात्साम्यमूलसमत्वतः १ प्राच्यादिपदयुक्तायाः श्रुतेरनुमितेऽपदे अर्थाबोधादमोचेन्न सामान्यानुमा
नतः २ अष्टमाधिकरणमारचयति होलाकादिशिष्टाचाराणां हारीतादिस्मृतिविशेषाणां चानुष्ठातृपुरुषभेदेन व्य
वस्थितं प्रामाण्यं [illegible] ये ऽतः देशविशेषे तेषां दृष्टत्वात् होलाकादयः प्राच्यैरेव क्रियन्ते वसन्तोत्सवो होलाका आह्नी
नैबुकादयो दाक्षिणात्यैः स्वस्वकुलागतं करंजकादिस्थावरदेवतापूजादिकमाह्नीनैबुकशब्देनोच्यते उद्वृषभयज्ञादयः उदी
च्यैः ज्येष्ठमासपौर्णमास्यां बलीवर्दान् भञ्चयीधावयंति सोऽयमुद्वृषभयज्ञः एवं हारीतादिस्मृतिः काश्चित् क्वचिद्देशविशे
षे दृश्यन्ते तस्माद्व्यवस्थितं प्रामाण्यमिति चेन्मैवं तन्मूलत्वेनानुमितस्य वेदस्य सर्वसाधारणत्वेन तेषामपि सर्व
साधारणत्वात् अत्रैवमनुमतमाह प्राच्यादिभिर्व्यवस्थयाहोलाकादिष्वनुष्ठीयमानेषु तन्मूलश्रुतिरपि प्राच्यादिप
दयुक्तैवानुमातव्या तत्र प्राच्यादिपदस्यार्थेऽनुबुध्यते ये पुरुषाः किंचित्कालं प्राच्यां दिशि निवसन्ति उपलभ्यन्ते तत्र प्रोत्तप्राच्या
दिपदस्यार्थाबोधादप्रामाण्यं श्रुतेरिति चेन्मैवं अनुष्ठानसामान्यस्य मूलश्रुतिकल्पकत्वात् अतः प्राच्यादिपदरहितैव
सत्यर्थबोधादनुमितायाः श्रुतेः प्रामाण्यं गोगाव्यादिषु साधुत्वे प्रयोगे वानेकश्रुत नियमोऽस्ति वा नास्ति व्याकृते मूलवर्जना
त् १ साधुत्वेन वसुज्ञीत गवाद्या एव साधवः ३ तस्मिन्नियमः पूर्वस्मिन् व्याकृतिवर्जनात् २ नवमाधिकरणमार
चयति व्याकरणाभिज्ञैः सास्नादिमहत्पशौ गौरित्येष शब्दः प्रयुज्यते तद्वन्निमित्ते स्वस्वदेशीयभाषामनुस
त्य गावी गोणी गोपोतलिकेत्येवमादयः शब्दाः प्रयुज्यन्ते तत्रेदृश एव प्राहुः साधवो नेतरे इति एतस्मिन्नर्थे नियाम

१६

कं नास्ति न यथा प्रयोगे ऽपि नियामकं नास्ति ईदृक् शब्द एव साधुः प्रयोक्तव्यो न त्वन्यादृश इति नन्वाव दुष्टत्वं वक्ष्यते नियाम
कः इति तस्य सर्वप्रत्यक्षसमानत्वात् नापि व्याकरणस्मृतिर्नियामिका तस्या निर्मूलत्वेनाप्रमाणत्वात् न ह्यभि
युक्तप्रयोगमूलत्वं तस्या अन्योन्याश्रयत्वप्रसंगात् व्याकरणस्मृतेः प्रामाण्ये सिद्धे तदनुसारेण प्रयोक्तॄणामभियुक्त
त्वसिद्धिः तत्सिद्धौ तत्प्रयोगमूलतया व्याकरणस्य प्रामाण्यं तस्मान्नास्ति साध्वसाधुत्वप्रयोगयोर्नियम इति प्राप्ते
ब्रूमः साधूनेव शब्दान्प्रयुञ्जीत न त्वपभ्रंशानित्यस्ति नियमः श्रुतिक्रमेण [illegible] दोषवादिनो वेदवाक्ययोः श्रवणात् एकः
शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति श्रुतिवाक्यं तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो
ह वा एष यदपशब्द इति श्रुतिवाक्यं यथा प्रयोगे नियमस्तथा साधुत्वे ऽपि नियमो ऽस्त्येव गवाद्या एव साधवो न तु गाव्या
दय इति अस्मिन्नर्थे व्याकरणस्मृतिर्नियामिका न च निर्मूलत्वं पूर्वपूर्वव्याकरणस्मृत्यन्तरमूलत्वात् एतदेवा
भिप्रेत्योक्तं [illegible] व्याकरणप्रणयनादिना [illegible] व्याकरणस्य प्रामाण्यं वेदेनैव साक्षा
[illegible] तथा चाथर्वणिका आमनन्ति द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वे
दो यजुर्वेदः सामवेदो ऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति तैत्तिरीयब्राह्मणे ऽपि व्याकर
णस्योपादेयता श्रूयते वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति [illegible] मध्यतो ऽवक्रम्य व्या
करोत्तस्मादियं व्याकृता वागुद्यत इति व्याकर्तारश्च पाणिनिकात्यायनपतञ्जलयो मन्वादिसमानाः तस्मात्साधू
नामेव प्रयोगात् गवादीनामेव साधुत्वे व्याकरणस्मृतिः प्रमाणं [illegible]
[illegible] अप्रमाणत्वं [illegible] निर्णीतिः [illegible] व्याकृतत्वात् लोके पद [illegible]

भिन्नमुक्तानामिति भिदास्फुरा २ वर्णैकृन्तात्यदैकत्वं क्वाचित्कीर इत्यभिव्यक्ता । प्राग्विकेणपदैकेनतदर्थैकं तथा विधं
१२ २ श्रुतेवमुक्तमाह अथ प्रमालभेतित्य त्राकारवकारयोर्मध्यवर्त्तिनो वर्णस्य दत्यत्वे संधत्तत इहिते दीर्घदमालभेत
-ति प्रयोगो भवति तालव्यत्वेऽत्वं न भवाचिन्त्वं ततः सहयादप्रामाण्यमिति चेन्न व्याकरणानुसारेणाश्रुत्वाप्राव्रि
त्यस्माद्वाततो राणादिकेवप्रत्ययेसतितालव्यत्वनिर्णयात्वेनस्मातपुस्मालभनपासम्प्रसारण २१२८ दशमाधिकर
णप्रयमवर्णकमारचयति लौकिकापदपदार्थौ वैदिकपदपदार्थाभ्यामभ्योऽन्यतः रूपभेदात् पदेतावद्रूपभेदाद्
श्रयते अत्यशद्गुकाकारादिर्वेनलोके नियतः वेदेत्वक्कचिदाकाररहितः पद्यते प्रयत्नपुरुषं त्मनेति ब्राह्मण
इतिलोकेवेदेत्वन्यथा पद्यते प्राप्त एणासः पितरः सोम्यास इति अर्थभेदोपि स्फुटः उत्तानामर्दैवगवा व
हेतीति पुष्प एव मनुष्यगवा स्तवो चायं हं ति वेदे वनस्पतिर्हि रएणपणः तथा चश्रूयते देवेभ्यो व
श्रु॰ नस्पते हवींषि हिरण्यपर्णप्रदिवस्तेऽर्थमिति तस्माल्लोकवेदयोः पदपदार्थावन्यावितिप्राप्ते ब्रूमः यएव लौकि
काः पदपदार्थास्तएववैदिकास्तथाहि वर्णानां तावन्नित्यत्वप्रथमपादे साधितं यथा प्रयोक्तृरूपं प्रकृषा
भेदप्येकैकस्य पुरुषस्य बहुकृत्वउच्चारणभेदेपि तत्रवामी वर्णा इति प्रत्यभिज्ञानादुर्णकां तथालोके याज्ञिग
वाय्वादि पदानि तान्येव वेदे विधीयमानानि त्वबाधितप्रत्यभिज्ञया पदेकत्वसम्भुपयुक्तमनादेवासहुत्यादि
पदभेदस्तुकाचित्कः नेतावतावद्भत्तरप्रत्यभिज्ञावगतपदैक्यसम्पाठशाको अन्यथा सोयं देवदत्त इति प्रत्यभि
ज्ञाया देवदत्ते कुमारादि दशादिभेदस्मानेणापाद्यत पदैक्यवायेकाम वयम्याविशेषेण प्रायेदृष्टयकत्व
त्वत्र भावास्योपदेकत्वेप्रसज्येते एतदेवाभिप्रेत्याचार्यो लोकावगतसामर्थ्यः शब्दो वेदेपि बोधकः १२

एव तस्माद्या

ति चैवं (स्व) सत्यवहननीयादिशब्दानां सर्वेषां चालौकिकत्वेऽपि सिद्धपदसमभिव्याहाराद्व्युत्पत्तिः सिध्यतीति ३ तान
वहननादिकं न वैयर्थ्यवादः अस्तु वा न यावहननं तया प्रवृत्तानां दिशब्दानामदर्थास्तु लोकेऽपि ... एव लौकिकाः पदपदा
र्थास्त एव वैदिकाः व्यक्तिर्व्रीह्यादिशब्दार्थ आकृतिर्वा क्रियान्वयात् व्यक्तिर्युक्ता निवेलाया माह तासोपल
क्षणे १ शक्तिग्रहादिबुद्धिभ्य आकृतेरर्थतोचिता क्रियापर्यवसानाय व्यक्तिस्सा तूपलक्ष्यते २ गवा
दि चोदनाकर्मा जातिव्यक्त्याचरनिर्णयात् आनन्त्यव्यभिचाराभ्यां न व्यक्तिरिति निर्णयः ३ हिनी
यवर्णकमारचयति व्रीहीनवहन्ति पशुमालभेत गामानय ब्राह्मणं न हन्तव्य इत्यादिप्रयोगेषु व्रीह्यादिशब्दा
नां व्यक्तिरर्थः कुतः अवहननादिक्रियाविधेस्सर्वेणैव योग्यत्वात् न त्वाकृतिरवहन्तुमालब्धुमानेतुं हन्तुं वा योग्या
नन्वानन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः संभवति अनन्ता हि गोव्यक्तयः अतीतानामनागतानामनेके
देशवर्तिनां गवामियत्ताया ज्ञातुमशक्यत्वात् किंच शुक्लव्यक्तौ व्युत्पन्नो गोशब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थं व्य
भिचरेत् तत्र कुतः व्युत्पत्तिरिति चेद् एवं तर्हि व्युत्पत्तिकाले साव्यक्तिर्व्याप्तिर्लक्ष्यतामिति प्राप्ते ब्रूमः अन्वयव्यतिरे
काभ्यामाकृतेः शक्तिग्रहणनिमित्तत्वात् तयोराकृतावेव संभवाच्छब्दार्थत्वं तस्या एवोचितं किंच अगृही
तेनाद्यैव व्यक्तिवादिनः संशयो भवेत् तस्मादाकृतेरेवाभिधेयत्वम् आकृताववहननादिक्रियानपर्यवसानेन हि व्य
क्तिस्तत्रोपलक्षणीया किंच श्येनचितं चिन्वीतेत्यादावाकृतेरेव साहश्यप्रतियोगितया कार्यान्वयादश्येनेन
स्यादाकृतिः शब्दार्थः अतएवाभ्यहमत माहं स्पष्टार्थः इति माधवीये जैमिनिन्यायमालाविस्तरे प्रथमाध्या

न वादीति ४

म्य॰ मा॰

२४

उद्भिदादिपदं धर्मे किं प्रमाणमुत न प्रमा विध्यर्थवादमंत्रेषु तस्यानंतर्भावतो न मा १ अंतर्भावो विधावुद्भिदा यजेतेति द्र
श्यते नामत्वेनान्वयो वाक्यं बध्यतेऽतः प्रमैव तत् २ चतुर्थपादस्य प्रथमाधिकरणं वार्त्तिककारोक्तनमा
रचयति उद्भिदा यजेत बलभिदा यजेत विश्वजिता यजेतेति समाम्नायते तत्रोद्भिदादिपदं न धर्मे प्रमाणं कुतः प्रमा
णत्वेनाभिमतेषु त्रिषु वेदभागेष्वनंतर्भावात् विधिः सत्यां प्रमाणं अर्थवादमंत्रौ तु विध्यन्वयेन तत्र न तावदुद्भिदादिप
दं विधावंतर्भवति विध्यर्थरूपाया भावनायाः भाव्यकरणेतिकर्तव्यतारूपेकस्याप्यवाचकत्वात् नाप्यर्थ
14
वादत्वं स्तुतिनिंदयोरभावात् नापि मंत्रत्वं उत्तमपुरुषादीनां मंत्रलिंगानामभावात् तथा चोक्तं उत्तमामंत्रणं संस्तुत
त्वानंतरूपाद्यभावतः मंत्रप्रसिद्ध्यभावाच्च मंत्रत्वेनानुपपन्नमिति अग्नये जुष्टं निर्वपामीत्युत्तमः पुरुषः अग्ने यशा
मू॰ स्विन्यशसेमर्पयेत्यामंत्रणं उर्वी वास्यर्वी वासीत्यस्तत्पुरुषं इषेत्वोर्जेत्वेति त्वानन्तरपदं आदिशब्देनाशी
र्वचनाशतिपादनादयः एवमेषामनन्तर्भावादप्रमाणमिति चेत् विधिशेषाकरणे न भावात् यद्यपि लिङ्प्रत्यये पद
न सह समानपदोपात्तो यजिधात्वर्थः करणत्वेनान्वितस्य यजेर्नामत्वेनोद्भिदादिपदमन्वेतीति न सा
प्रमाणं गुणनामधेयवाक्यविधित्सानिरूपणे क्रियतः ज्योतिष्टोमं समाश्रित्य पशुर्थं गुणचोदना १
फलेऽद्भिदाख्यमानेषा निरूढे यागनामनि नामत्वमुचितं यागसामानाधिकरण्यतः २ द्वितीयाधि
करणमारचयति १४२ उद्भिदा यजेत पशुकाम इत्यत्र श्रूयते नोद्भिच्छब्देनाख्यातोऽयं विधीयते
सोऽयं यागेऽकस्मिन् गुणः स्यादुद्भिदेति तत्सेनगुणेन विधिना समानत्वात् अथो चोत्तदधिकरणार्थो २४

लोके प्रसिद्धः॰ उद्भिच्छब्दार्थस्य प्रसिद्ध इति तन्न रूढ्यभावेपि अवयवार्थेन निरूपणात् न प्रसिद्धेः उद्भिद्यते भूमि
रनेनेति व्युत्पत्त्या खनित्रवाच्यसौ शङ्कुः न चात्र पशुफलकः कश्चिद्यागो विधीयते इति वाच्यं पशूनां गुणफल
त्वात् यथा गोदोहनेन पशुकामस्येत्यत्र पशवो गोदोहनगुणस्य फलं तथेह खनित्रगुणस्य फलमस्तु यदि
चमसेनापः प्रणयेदिति विहितप्रकृतमपां प्रणयनमाश्रित्य गोदोहनं विधीयते तत्तर्हि ज्योतिष्टोमेन
यजेतेति विहितप्रकृतज्योतिष्टोममाश्रित्य खनित्रं विधीयतां तस्माद्गुणविधिरिति प्राप्ते ब्रूमः पशुकामो य
जेतेत्यस्य पदद्वयस्यायमर्थः पशुरूपं फलं यागेन करणेन कुर्यादिति केन यागेनेत्याकाङ्क्षायामुद्भिदेति तृतीयां ने॰
तं एवं यागनामत्वे नान्वेति उद्भिद्यते पशुफलमनेन यागेनेति निरुक्त्या नामत्वमुद्भिदस्तदर्थं उपपद्यते एव
मपि गुणविधिनामधेयत्वयोः शब्दनिर्वचनसाम्यान्न निर्णय इति चेन्न सामानाधिकरण्यस्य निर्णायकत्वा
त् उद्भिन्नामकेन यागेन फलं कुर्यादित्युक्ते सामानाधिकरण्यं लभ्यते गुणत्वे तु खनित्रेण साध्यो यो यागस्ते
न फलं कुर्यादित्येवं वैयधिकरण्यं स्यात् यदि खनित्रवता यागेनेति सामानाधिकरण्यं योज्येत तदा मत्वर्थल
क्षणाप्रसङ्गेन तस्मादुद्भिदादिपदं नामधेयं दध्ना जुहोति व्रीहिभिर्यजेतेत्यादिषु द्रव्यविशेषदध्यादिप्र
म॰ ख्यातत्वेन रूढतया यागनामत्वासंभवाद्द्रव्यागत्या गुणत्वमाश्रितं सोमेन यजेतेत्यत्रापि प्रसिद्धार्थनामधेयत्वकल्प
नातो वरं प्रसिद्धार्थद्वारेण लक्षणाश्रयणमिति मिश्रमतं सोमवता यागेनेति मत्वर्थलक्षणां स्वीकृता उ
द्भिच्छब्दस्य न लोकप्रसिद्धार्थाभावादुक्तरीत्या नामत्वमुक्तं प्रयोजनं तु नामत्वे सर्वत्राव्यवहितरूपेण न होतरेण

१४ नामधेयम् विग्वरलादि शब्देनाहेयवत् इति प्राप्ते नोपायो लब्धः कश्चिदस्ति तस्मादुद्भिदादिकं नाम
धेयम् लौकिके गणयागे स विधिः स्यादुच्यते इति चेत् निरूढत्वाच्छ्रौते यागस्य नामत्वान्निरपेक्षता २ १
यच्चित्रया यजेतेति तत्र गुणेन नाम वा भवेत् चित्रस्त्रीत्वगुणोद्देशे पशौ मीयते यशो २ द्वयोर्विधौ
वाक्यभेदो वैशिष्ट्ये गौरवं ततः स्यान्नामधेयमत्रापि बहिष्पवमाने तथा २ पूर्वपक्षमतमाह उद्भि
दा यजेतेत्यत्र गुणविधिः नचास्य कश्चिच्छ्रौतगुणोपलभ्यते ततो लौकिको मात्रगणयागादिराश्रय
त्वेनापेक्षणीयः तस्मिन्यागे गुणोयं विधीयते तथा सति साधितत्वात् प्रामाण्यमस्य स्त्रीत्वादनायाद
ति चेन्नैव पूर्वोक्तनिरूढत्वाच्छ्रौतयागनामत्वसति निरपेक्षत्वात् १७२ तृतीयाधिकरणमारचय
ति चेन्नैव नत्रापि त्राशङ्का नोद्भिच्छब्दवद्यौगिकः किं न स्यात् चित्रत्वस्त्रीत्व
यच्चित्रयेति ति विचित्रया यजेत पशुकाम इत्याम्नायते नत्र चित्राशब्दो नोद्भिच्छब्दवद्यौगिकः
स विधत्ते लोके तथा न यामत्वाग्नीषोमीयं पशुमालभेते त्यभिहित पशुयागमनुवदते स्य
व नेन पदेनानूदिते तस्मिन्पशौ चित्रत्वस्त्रीत्व गुणविधी यत इति प्राप्ते ब्रूमः चित्रत्वस्त्रीत्वे चेति द्वावेतौ गुणौ
निद्येत नयोर्द्वयोर्विधाने वाक्यं तथा चोक्तमाप्रकर्मणि नानेकोविधातुं शक्यते गुणः अप्राप्ते तु विधीयते व
अथवा ह्वेवाक्यं यत्नत इति वाक्यभेदपरिहारायगुणद्वयविशिष्टं पशुद्रव्यं रूपकारकं विधीयते तदा गौरवं स्या
न तस्माच्चित्राशब्दः एवं वयजि सामानाधिकरण्येन यागनामधेयं भवति चित्रत्वं वतस्य विलक्षण
इत्यादौ णपदयते नटपिमधप तमाचोधाना स्तंडुलास्तान्तेस प्राजापत्यान् मिलित्वा ध्यादीनि वि १४

चित्रासिद्धे यद्द्रव्याणि षडन्नानानि तदेतच्चित्रनामकस्य यागस्योत्पत्तिवाक्यं यागस्वरूपश्रवणाद्दध्यादिद्रव्यप्र
जापतिदेवतयोरत्र यदि श्रूयमाणत्वात् । उत्पन्नस्य तस्य यागस्य चित्रया यजेत पशुकाम इत्येतत्फलवाक्यं
एवं च सति प्रकृतार्थोल्लेख्येतेऽग्नीषोमीयपशुनेवादेन गुणविधाने प्रकृते तद्धात्वर्थं प्रकृतप्रतियोगि प्रसज्येयातां ।
लिङ्गत्वयस्य चानुवादत्वाभीकारान्तरेण विध्यर्थबाधेन तस्माच्चित्रापदं नामधेयं । यथा चित्राशब्दे नामधे
यत्वं तथा बहिष्पवमानशब्दे आज्यशब्दे पृष्ठशब्दे च तत्कर्मनामधेयत्वं च योजनीयं । एवं हि श्रूयते त्रिवृद्बहिष्प
वमानं पंचदशान्याज्यानि सप्तदशानि पृष्ठानीति । अस्य वाक्यत्रयस्यार्थो विविच्यते सामगानामृ
गयथेऋचात्मकानि स्तोत्राण्याम्नातानि तत्रोपास्मै गायता नर इत्याद्यस्तृचः दविद्युतत्या रुचेति द्वितीयः
यः पवमानस्य ते कव इति तृतीयः ज्योतिष्टोमस्य प्रातःसवनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं साम गान
वं तदिदं सूक्तत्रयगानसाध्यं स्तोत्रं बहिष्पवमानमित्युच्यते तेन चावस्थितानामृचां पवमानार्थत्वात् बहिः सं
बंधाच्च न च बिल्विदं स्तोत्रं भिन्नतरस्तोत्रवत् सदोनामकस्य मण्डपस्य मध्ये प्रोद्गात्रवयोः स्तावकसामगायाः सन्निधौ प्र
युज्यते किं तु सदसो बहिः प्रसर्पद्भिः प्रयुज्यते तस्य च बहिष्पवमानस्य त्रिवृन्नामकः स्तोमो भवति तस्य च
स्तोमस्य विधायकं ब्राह्मणवाक्यमेवमाम्नायते । तिसृभ्यो हिंकरोति स प्रथमया तिसृभ्यो हिंकरो
ति स मध्यमया तिसृभ्यो हिंकरोति स उत्तमयोद्यतीति त्रिवृतो विष्टुतिरिति । अयमर्थः सूक्तत्रयगतानां
नवानामृचां गानं त्रिभिः पर्यायैः कर्तव्यं तत्र प्रथमे पर्याये त्रिषु सूक्तेषु याः प्रथमास्ताः ऋचः द्वितीयप

वै

२१ यो ये मध्यमाः तृतीये पर्यायेऽन्तमाः तिसृभ्यः इति तृतीयार्थे पंचमी हिंकरोति गायतीत्यर्थः सेयं पर्यायत्रयप्र
कारोपेता गीतिः त्रिवृत्स्तोमस्य विष्टुतिः स्तुतिप्रकारविशेषः तस्या विष्टुतेरूपं तीति नामेति एवं परिवर्तिनी उ
द्यतिनीति द्वे विष्टुती तयोः परिवर्तिन्येवमाम्नायते तिसृभ्यो हिंकरोति स पराचीभिस्तिसृभ्यो हिंकरोति
16 स पराचीभिस्तिसृभ्यो हिंकरोति स पराचीभिः परिवर्तिनी त्रिवृतो विष्टुतिरिति पराचीभिरनुक्रमेणाम्ना
ताभिरित्यर्थः उद्यतिन्येवमाम्नायते तिसृभ्यो हिंकरोति स पराचीभिस्तिसृभ्यो हिंकरोति या मध्य
मा सा प्रथमा या उत्तमा सा मध्यमा या प्रथमा सोत्तमा तिसृभ्यो हिंकरोति या उत्तमा सा प्रथमा या प्रथमा
या मध्यमा सा मध्यमा या मध्यमा सोत्तमा उद्यतिनी त्रिवृतो विष्टुतिरिति अत्र प्रथमस्तोमपादे क्रमेण द्वितीये मध्यमो
त्तमप्रथमाः तृतीये उत्तमप्रथममध्यमाः इत्येवं व्यत्ययेन संगानं गातव्याः तदिदं विष्टुतिद्वयं विकल्पि
तं त्रिवृत्स्तुत्स्तोमस्य स्वरूपं यत्र यौगिकं एवमिति एवं पादेन निर्णीतेऽन्तरांगं येव हि पवमानस्त
त्रिभ् तेषु पवमानेषु च त्विति स्तोमान्याम्नातानि अग्र आयाहि वीतये इत्याद्यस्तृचं आ नो मित्रावरुणेति हि ती
यं आ याहि सुषुमा हि त इति तृतीयं इन्द्राग्नी आगतं सुतमिति चतुर्थं तानेतानि शातः सवनेगाय
त्रसामान्याग्नेयमानानि चत्वार्याज्यस्तोत्राण्युच्यन्ते तत्र त्रिवृच्चनचतुष्टयं ते यदाज्यमीशुस्तदाज्यानां
माज्यत्वमिति तैत्तिरीयस्तोत्रेषु पंचदशानामृचः स्तोमो भवतीत्यस्य स्तोमस्य विष्टुतिरेवमाम्नायते पं
चभ्यो हिंकरोति स तिसृभिः स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया पंचभ्यो हिंकरो २१

स एकया

सएकया॰

तिसृभ्य एकया स तिसृभिः तिसृभिरित्येकं सूक्तं त्रिवृद्विष्टुत्यावर्तनीयं तत्र प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासः द्वितीयावृत्तौ मध्य
मायास्तृतीयावृत्तौ उत्तमायाः सोयं पंचदशस्तोमः केभ्यः सूक्तमर्भः सूक्तेभ्य ऊर्ध्वं सूक्तानां पंचदशी लिमाधोदिनव
वमानसूक्तान्याम्नायन्ते ऊर्ध्वं चत्वार्याम्नातानि तेषु मिलाश्रूयन्ते तन्महत्त्वात्पाद्यं कथानश्चित्रन्याप्रवइति द्विती
यं तेषां सप्तस्तोमिन्द्रं मितितृतीयं तरोमिवीविदद्धसू मितित्रिवृतः एतानि क्रमेण रथन्तरवामदेव्यानोधस
कालेयसामानि संधोदिनसवनेगीयमानानि दृष्टस्तोत्राणीत्युच्यन्ते स्पर्शनात्स्तोत्राणीत्येवं निरुक्तिर्द्रष्टव्या ते
षु स्तोत्रेषु सप्तदशस्तोमो भवति तस्य स्तोमस्य विष्टुतिरेवमाम्नायते पंचभ्यो हिंकरोति स तिसृभिः स एकया
स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया सप्तभ्यो हिंकरोति स एकया स तिसृभिः स ति
सृभिरिति अत्र प्रथमावृत्तौ प्रथमायाः ऋचः त्रिरभ्यासः द्वितीयावृत्तौ मध्यमायाः तृतीयावृत्तौ मध्यमोत्त
मयोः सोयं सप्तदशस्तोमः अत्र त्रिवृत्पिवाको त्रिवृत्त्वं चतुर्दशसप्तदशशाखाध्यागमेण विधायकत्वेन समाम्नाताः यदि
वद्दिश्यमानान्यष्टृष्टशाखाश्रुतियमणविधायकास्तु तदाशत्रुदाहरणं ग णाहृयविधानाहाय भेदः स्या
तस्माद्विहिस्यमानानादिशाखाः स्तोत्रनामधेयानि तेनात्मभिः कर्मोत्पन्नस्य त्रिवृदादिगुणविधीयन्ते ४४ वर्णः १
अग्निहोत्रं जुहोत्याघारमाघारयतीत्यत्र विधेयो गुणसंस्काराद्वाहोस्वित्कर्मनामनी १ अग्न्युपहोत्र
मचेति बहुव्रीहिगतोत्तलः गुणविधेयौ नामत्वे ह्यंनस्यान्तरत्वतः ते २ संस्क्रियाघारमाघारयतीत्युक्तौ
द्वितीयया आघारेत्वग्निहोत्रेति यौगिके कर्मनामनी २ अग्निर्ज्योतिरिति प्रोक्तेमन्त्रार्थे वस्तुयाद्यते चतुर्थी

मु. मा.
१०

नवाक्यान्तरे द्वितीयायास्त्वियं गतिः । धनासाधिते हि धात्वर्थे कारणत्वे तत्तस्य सा द्वितीय साध्यतां व्रजति संस्कारेणैव शंक्याः ॥ कि
यावतः ॥ चतुर्थाधिकरणमारचयति अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामत्वे द्रव्यदेवतयोरभावाद्यागस्य
स्वरूपमेव न सिद्ध्येत् ततोग्निदेवतारूपगुणान्तरं विहितमेव विधीयते आघारशब्दस्य क्षरणदीप्त्योरित्यस्माद्धा
तोरुत्पन्नः तत्र तन्नमा चेष्टितस्मिंश्च यत्नेहितीयाः स्वत्यास्स्कायैत्वप्रतीयतेत्तत्र संस्कृतत्वं तन्मूर्णाश्रयाजेद्रव्यं
भवतितस्मादग्निहोत्राघारशब्दौ गुणसंस्कारयोर्विधायकाविति प्राप्ते ब्रूमः अग्निर्ज्योतिर्ज्योतिरग्निः स्वा
हेतिसायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति विहितेन मन्त्रेण प्राप्तत्वाद्देवताया न विधे
यातत्तोग्निसूर्यदेवताकस्य सायंप्रातःकालयोर्नियमेनानुष्ठेयस्य कर्मणोग्निहोत्रमिति यौगिकं नाम
धेयं योगस्य बहुव्रीहिणा दर्शितः तत्र होत्रशब्देन द्रव्यमुच्यते तस्याघारमाघारयतीत्यनेनैतस्य द्रव्यस्याभूतत्वा
त्तत्तत्संस्कारस्याविधेयत्वादाघारशब्दोपि यौगिकं कर्मनामधेयं तस्मिन्कर्मणि तिन्नेरुक्ती दिशमारभ्य प्रागीदिश
मविच्छिन्नाभितत्वाघारयितव्यमिति तत्स्तेन साकर्मणेन नाम्नानुनामत्वेसत्युद्भिदा यजेतज्योतिष्टोमेनयजेतेत्यादाविव
धात्वर्थेनकरणत्वेन सामानाधिकरण्यादग्निहोत्रेण जुहोतीत्याघारेणाघारयतीति तृतीया भवितव्यं नैष दो
षः प्रत्ययानामहृदुं धात्वर्थस्य सिद्धवस्तुकारकत्वे कारणत्वेपितत्तः सर्वसाध्यत्वाकारकत्वमग्निहोत्रमाघारमिति
द्वितीयायायुक्तत्वान्ननुचान्नद्वितीयानुसारेण व्रीहीन्प्रोक्षतीत्यादाविव संस्कारः शंकनीयः व्रीहिशब्दवदग्नि
होत्राघारशब्दयोः प्रसिद्धद्रव्यवाचकत्वाभावेन क्रियायाश्चिन्त्याभ्युपगमात्तस्मादग्निहोत्राघारशब्दौ द्वि । १८

श्येनेनाभिचरन्यजेतेति सूत्रनामत्वे द्रव्यदेवतयोरभावाद्यागस्वरूपमपि न सिध्येत्ततः

हेयोपाधयः यागगुणसंस्कारविधायिनो न भवतः किंतु कर्मान्तरयोर्नामनी २८५ श्येनेनाभिचरन्यजेतेति
फलतो गुणः विधीयते उपहिद्रूपो नामधेयात्मकमेण ॥ १ श्येनेनेति गुणः काम्यः सोमिकः सोमबाधया न चित्राव
दाक्यभेदाद्वोः सोमबन्धग्रहः २ यथा वै श्येनो निपत्याददान उपमानोपमेयता नैकस्मिन्स्तेन गोणोपस्थितत्वात्स्यान्नामता
नता ३ पंचमाधिकरणमारचयति सोमयागे नित्यं सोमद्रव्यं बाधित्वा सोमस्य स्थाने उपहिद्रूपः काम्यो
गुणो विधीयते तथा सति श्येनशब्दस्य पक्षिणि लोकसिद्धत्वात् अर्थवदेन गृह्यते तेन च गुणविधित्वे चित्रायामिव वा
क्यभेदस्थापादयितुं शक्यते चित्रत्वस्त्रीत्ववद् गुणद्वयाभावादिति प्राप्ते ब्रूमः यथा वै श्येनो निपत्याददत्त एवमयं द्विषन्तं भ्रा
तृव्यमादत्ते यमभिचरति श्येनेनेति वाक्येनोक्त उपमानोपमेयभावः पक्षिण्येकस्मिन्न युज्यते तस्मात्पक्षिगुण उ
पमानस्य गुणः उपमेयकर्मण्यस्तीति श्येनशब्दस्याभिचारकर्मनामत्वं संदंशेनाभिचरन्यजेत गवाभिचारयमाणो
यजेतेत्यत्र संदंशेन दूरादादानमादत्ते यथा गावो गोपायन्तीति वाक्यशेषाभ्यामुपमानोपमेयभावाभिधानात् २८६ अथ
षष्ठाधिकरणमारचयति वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र वाजपेयशब्देन गुणो विधीयते अन्नवाची वाजशब्दः
तत्पानं पेयं सुराद्रव्यं तत्साधनत्वात्सुराग्रहः सुरा ग्रहस्यान्नमेयत्वात्तेन गुणेन वाजपेययुक्तेन यागेन स्वाराज्यं भावयेदित्येवं म
त्वर्थलक्षणाप्रसक्त्या तमेवं सप्तदश चरितस्य यजेतेत्याख्यातस्य वाजपेयगुणेन स्वाराज्यफले चैतन्येण संबंधाभीकारा
त्वाजपेयेन द्रव्येण स्वाराज्याय यजेतेत्येवमुभयसंबंधः ननु गुणसंबंधे सति वाजपेयगुणेन यागं कुर्यादिति यजेः
कर्मकारकत्वं भवति फलसंबंधे तु यागेन स्वाराज्यं संपादयेदिति करणकारकत्वं ततः कथमुभयसंबंध इति चेन्नाय

संदंशा गोशब्दयो
र्नामत्वे श्येनशब्द
वदूह्यम् यथा
सूत्रयजेतेत्यादि
श्लोकचतुष्टय
तत्रायेतिविर्

श्रु॰ मा॰ १८

यजेत वाजपेयेन स्वाराज्यार्थीत्यसौ गुणः नामवा गुणता तत्र योगाद्गुणफलद्वये १ साधारण्याद्यजेः कर्मकरण
त्वेन तत्र ता त्रिकद्वयविरुद्धं स्यात्तत्र ता या फलं प्रति २ उपादेयत्वविधेयत्वगुणत्वात्मकं त्रिकं यजेः उद्देश्यत्वानुवाद्यप्र
धान्यत्वत्रिकं तस्य गुणं प्रति ३ सत्यात् तत्र तदृष्टान्तो वाक्यं गि येन तेन सः वाजपेयेति शब्दोपि कर्मनामाग्निहोत्रव
त् ४ यजेः साधारणत्वेन हि द्विरूपत्वसंभवात् यजेतेत्यत्र प्रकृत्या यागस्तु कः प्रत्ययेन भावनोक्तात यो स्तु समम
भिव्याहारात्संबंधमात्रं गम्यते तत्र कर्मत्वकरणत्वयोः साधारणेन स्वस्तु तत्र कर्मत्वस्यैवाकारणत्वस्यैव वा सामानाद
भिधायिका काचिद् साधारणविभक्तिः श्रूयते ततः साधारणस्य यजेरुभाभ्यां गुणफलाभ्यां युगपत्संबंधे सति
यथोचितसंबंधविशेषः — पर्यवस्यति एवं तत्रेण संबंधभागी कारे वाजपेयद्रव्येण यागं क्रियां सम्पमानत्वात् गु दित्मर्थस्य
णविधित्वेपि नास्ति मत्वर्थलक्षणा यद्यद्विदादिष्वेवं गुणविधिः स्यात् हि तान्यपि वाक्यान्यत्रोदाहृत्य तत्
यसिद्धान्तः पुनरुक्तिप्रसङ्ग इति प्राप्ते ब्रूमः यजेः स्वतन्त्रेणोभयत्र संबंधे सति विरुद्धत्रिकद्वयापत्तिः स्यात् उपादेय
त्वविधेयत्वगुणत्वं चैकं त्रिकं उद्देश्यत्वमनुवाद्यत्वप्राधान्यत्वं चेत्यपरं त्रिकं तत्रोद्देश्यत्वादयस्त्रयः स्वाराज्यफलनिष्ठा
धर्माः उपादेयत्वादयस्त्रयः साधनभूतयजिनिष्ठाः फलस्य हि उद्देश्यत्वं उपादीयते फलमुद्दिश्य यजिर्विधीयते फलं प्र
धानं यजिरुपसर्जनं फलस्योद्देश्यत्वं नाम मानसापेक्षो विषयाकारः यजेरुपादेयत्वं नामानुष्ठीयमानत्वा
कारः तावुभौ मनःशरीरोपाधिकौ धर्मौ अनुवाद्यत्वविधेयत्वधर्मावपि [illegible] ज्ञान स्यानुष्ठेय
त्वकथनं विधिः फलयागयोः साध्यसाधनरूपतया प्राधान्यत्वोपसर्जनत्वे एवं सति फलं तत्साधनयोः स्वाराज्य १८

यागयोः साध्यसाधनभावपर्यालोचनायां यथा फलस्योद्देश्यत्वादित्रिकं यागस्योपादेयत्वादित्रिकं व्यवतिष्ठते तथा यागस्य वाजपेयद्र-
व्यस्य च साध्यसाधनभावपर्यालोचनायां यागस्योद्देश्यत्वादित्रिकं वाजपेयद्रव्यस्योपादेयत्वादित्रिकं पर्यवस्यतीति ततो याग-
स्य फलद्रव्याभ्यां युगपत्प्रतियोगिभ्यां युगपत्संबंधे सति विरुद्धत्रिकद्वयमापद्येत ननु तर्हि मा भूत्तेनोभयसंबंधः पृथक्
संबंधाय यजिरावर्तनामिति चेन्न वाक्यभेदप्रसंगात् द्रव्येण यागं कुर्यादित्येकं वाक्यं यागेन फलं कुर्यादित्यपरं तस्माद्वाजपे-
यशब्दो न गुणविधायकः किं तु यथा लोके द्रव्यं निमित्तीकृत्याग्निहोत्रशब्दवत्कर्मनामनामधेयं २८७ ॥ यदाग्नेयोष्टा-
कपाल इति नामगुणयोरेव वा नामाग्निहोत्रवन्नैवं नामत्वे देवता न हि २ मंत्रोपि नेह प्रत्यक्षस्तर्हि तद्देवताविधिः देवद्र-
व्यविशिष्टस्य विधानादेकवाक्यता २ यदाग्नेय इति शास्त्रे न मानं विधसंभवात् इति चेन्न विशिष्टविधौ सत्यप्रमाणतः धी
२ बर्हिराज्यपुरोडाशशब्दाः संस्कारवाचिनः जात्यर्थावाणास्तु दृष्टे लोके तु संस्कारवाचिनः २ जातिस्त्वज्ञानसंस्कारे
प्रयुक्ता लोकवेदयोः विनापि संस्कृतिं लोकदृष्टत्वाज्जातिवाचिनः २ बर्हिरादौ निमित्तस्य द्वैधत्वान्नेति चेत् जा-
तेष्वनन्यनिमित्तत्वात्प्रयुक्ता चोदना प्रमा २ समासाधिकरणमारचयति दर्शपूर्णमासयोराम्नायते यदाग्नेयोष्टा-
पा४ कपालोमावास्यायां पौर्णमास्यां चाच्युतो भवतीति तत्र यथाग्निहोत्रशब्दः अग्नये होत्रमित्येतमर्थं निमित्तीकृत्य कर्मना-
मधेयं तथाग्नेयशब्दोपि अग्निसंबंधं निमित्तीकृत्य कर्मनाम स्यादिति चेत् मैवं नामत्वे देवता न हि त्यप्रसंगात् अग्निहो-
ज्योति त्रे त्वग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति अनेन वचनेन विहितो मंत्रः प्रत्यक्ष इति मांत्रवर्णिकी देवता लभ्यते इह त्व- विहितत्वं
नन्तादृशमंत्राभावादाग्नेयशब्द एव देवतां विधातुं शक्नोति अग्निर्देवतास्येत्यस्मिन्नर्थे तद्धितस्योत्पन्नत्वात् न च द्रव्यदेवत-
योरुभयोर्गुणयोर्विधाने वाक्यभेद इति शंकनीयं कर्मणोऽप्राप्तत्वेन गुणद्वयविशिष्टस्य कर्मणः एकेन वाक्येन विधानात्

स्र·मा·

लक्ष्य॰ वि॰ विधि पूर्वकर्मविधिसंभवात्प्रामाण्यम् २

१९

२४

अत्र गुरुमतमा
२० बर्हिरादाविति ॥

यत्र नेयइति ॥ बर्हिरास्येति

तस्मादाग्नेयशब्देन देवतागुणो विधीयते अत्र गुरुमतमाह उदाहृतवाक्यस्य देवताराहित्यप्रसंगेन नामत्वाभावाद्गुणयोर्वि-
धौ वाक्यभेदाच्च विध्यसंभवादप्रामाण्यमिति पूर्वपक्षः ।गु।मिति सिद्धान्तः २४८ सूक्ष्ममधिकरणमारचयति दर्शपूर्ण-
मासयोः श्रूयते बर्हिर्लवनादि आज्यं विलापयति पुरोडाशं पर्यग्निकरोतीति तत्र बर्हिरादिशब्दानां शास्त्रे सर्वत्र संस्कृतेष्वे-
व तृणादिषु प्रयोगात् स्त्रीत्वादिशब्दवच्छास्त्रीयत्वादि प्रावृत्तस्य सोमक्रयण्याप्यादि वनीयादिशब्दवत् संस्कारवाचिनो बर्हि-
रादिशब्दा इति चेन्मैवं अन्वयव्यतिरेकाभ्यां जातिवाचित्वप्रत्ययात् बर्हिरादिशब्दप्रयोगस्तत्र तज्जातिरित्यस्यावगमेर्लो-
केषु देवनाम्नि व्यभिचारः संस्कारव्याप्तस्य लौकिकप्रयोगव्यभिचारो दृश्यते क्वचिद्विशेषे लौकिकव्यवहारे
जातिमात्रमुपजीव्य विनापि संस्कारं ते शब्दाः प्रयुज्यन्ते बर्हिः शारदं गावो गतवत्य इति क्रय्यमाज्यमिति पुरोडाशेन मे
माता प्रहेलकं ददातीति च तस्माज्जातिवाचिनः प्रयोजनं तु बर्हिषां पावकत्वं सम्पाती त्वत्र विना संस्कारेण स्तरणसि-
द्धिः स्पष्टोऽर्थः २४९ नवमाधिकर॰ प्रोक्षणी संस्कृतिर्जातिर्योगो वा सर्वथा मिथः तथोक्तेः संस्कृतिर्जातिः स्याद्रूढेः प्रबल-
त्वतः १ अन्योन्याश्रयतो नाद्यो न जातिः कल्प्यशक्तितः योगः स्यात् ... प्रशक्तित्वात् ... व्याकरणाद्वेदवत् ॥
२ रूढियोगो योगरूढिर्वा निर्मन्थ्यस्य वेदनं आद्योऽस्य वदन्त्याचिरजातेनावनीतवत् ३ (प्रोक्षणीष्वर्थसं-
योगात्) दर्शपूर्णमासयोः श्रूयते प्रोक्षणीरासादयतीति तत्र प्रोक्षणीशब्दस्याभिमन्त्रणासादनादिसंस्कृ-
तिः प्रवृत्तिनिमित्तं अतः सर्वेषु वैदिकप्रयोगेषु दृष्टेषु संस्कृतानामेवापां प्रोक्षणीशब्देनाभिधीयमानत्वादि-
त्येकः पक्षः लोके जलक्रीडायां शालशीर्षि रुद्धजिताः स्म इत्यसंस्कृतास्वप्सु प्रयोगाद्बर्हिरादिशब्दवज्जा-
तीरूढत्वादुदकत्वजातिः प्रवृत्तिनिमित्तं न च प्रकर्षेणोक्षणस्य भिरिति योगो रूढिः कनीयः रूढेः प्रबलत्वादि

निपक्षांतरं तत्रन तावत्संस्कारो युक्तः मन्त्रोच्चारणयत्नात् विहितेष्वपि मंत्रणादिसंस्कारेष्वननुष्ठितेष्वपि यत्नसंस्कृता
स्य प्रोक्षणीशब्दप्रवृत्तेः तत्प्रवृत्तौ सत्यां प्रोक्षणीशब्देनाभिधानयोग्याभिमंत्रणादिविधिरिति नापि जातिपक्षो यु
क्तः उदकजातौ प्रोक्षणीशब्दस्य रूढत्वे व्यवहारे सर्वमलमूत्रस्वेदेनेतः परं शक्तेः कल्पनीयत्वात् ततो योगशब्दवदस्य
कर्णशब्दवच्चरूढिर्न भवति योगस्य व्याकरणस्मृतेः प्रापणार्थगात्रयोः कारणे ल्युट्प्रत्ययेन व्युत्पादनात्
तस्मात्प्रोक्षणीशब्दो यौगिकः सूत्रार्थः प्रोक्षणत्वं प्रयोजनं ॥ १८ ॥ दशमाधिकरणमारचयति । अग्निचय रूढिरिति
ने श्रूयते निर्मन्थ्येनेष्टकाः पचंतीति तत्र निर्मन्थ्यशब्दस्य सामर्थ्यं कीदृशीत्यभिसंशये वह्निमात्रादिवाचिशब्दव
त् लौकिकवैदिकसाधारणवह्निजातौ रूढिरित्येकः पक्षः प्रोक्षणीशब्दवद्रूढेः प्रबलत्वादरणिमंथनजन्यत्वा
चिरमंथनेनजं द्योगइति पक्षान्तरं लौकिके निर्मन्थनेन जन्यत्वादरणिना योगरूढिः पंकजादिशब्दवदाग्नेयस्या
धानकाले निर्मथ्य गार्हपत्ये नित्यं धृतो निश्चिरनिर्मथितः चयनकाले निर्मथ्यो वाथाधृतो निश्चिरचिरनिर्म सद्य एव लौकिकमथनेनजातं
थितः तेनेष्टकाः पच्यंते यथा ब्राह्मणेनात्तनयोर्हतयोर्नवनीतजन्यत्वसामान्येपि योगरूढ्याहृतनेष्वन
प्रो वनीतमिति व्यवह्रियते तद्वत् ॥ १९ ॥ पक्षे सात्मप्रायस्याद्य पर्वकाग्नेयाद्यष्टकांतिके वैश्वदेवेति शब्दोवे
गणः संवत्सरो नामवा ॥ १ ॥ नामत्वे हेयवादिहित्वात् द्वविधिर्गुणता ततः अग्न्यादिनिर्विकल्पात्ते विश्वेदेवास्तु
सन्नत ॥ २ ॥ अन्यत्राष्टासीयजेतेति तत्संदेहे नामवर्णितं अविधित्वेपर्यवस्या नामपाकप्रवर्णादिषु ॥ ३ ॥ इत्यते
न यजंते वाविश्वेदेवाइतीरणी निर्विकल्पे निर्विकल्पः स्यात्त्वत्र त्वत्रैवात्र इति ॥ पक्षादशाधिकरण

प्र·मा· मारयति । चातुर्मास्ययागस्य चत्वारि पर्वाणि वैश्वदेवं वरुणप्रघासाः साकमेधाः शुनासीरीयं चेति तेषु प्रथ
१· मे पर्वणि । अष्टौ यागा विहिताः आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं च
रुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति तेषामष्टानां संनिधा यागानां
विदमाम्नायते । वैश्वदेवेन यजेतेति तत्राग्नेयादीनष्टौ यागान् यजेतेत्यनूद्य वैश्वदेवशब्देन देवतारूपो
गुणस्तेषु विधीयते । यद्यपि वैश्वदेव्यामामिक्षायां विश्वेदेवाः प्राप्तास्तथाप्याग्नेयादिषु सप्तसु यागेष्वप्राप्तत्वा
द्विधीयते तेष्वग्न्यादिदेवताः सन्तीति चेन्न हि गत्यभावात्तेषु देवताविकल्पो युक्तः । नामधेयत्वे तु नामसामान्यस्या
विधेयत्वाद्द्रव्यदेवतयोरभावेन यागस्यानुस्वरूपासंभवात्कृत्यमानेन विधिरनर्थकः स्यात् तस्माद्गुणविधि
रिति प्राप्ते ब्रूमः उत्पत्तिवाक्यैर्विहितानामाग्नेयादीनष्टौ यागान् यजेतेत्यनूद्यमानानां संबन्धे वैश्वदेवशब्दो ना
मत्वेनोपपद्यते तेन च विधित्वाभावेऽपि नामोपदेशो वैयर्थ्यं प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यादिषु
वैश्वदेवशब्दे नैकैकेष्टानां सहायत्वमवहृतत्वात् नामप्रवृत्तिनिमित्तभूता निरूढिर्हि विधायामिक्षाया
गे विश्वेषां देवानामिज्यमानतया तत्सहचरितानामपि सर्वेषां छत्रिन्यायेन वैश्वदेवत्वं प्रथमं विश्वेदेवा अष्टा
नां कर्त्तार इति वैश्वदेवं तथा च ब्राह्मणं यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमिति देवतावि
कल्पस्तु समानबलत्वाभावान्न युज्यते । मध्यमादयस्तूत्पत्तिशिष्टत्वात्प्रबलाः विश्वेदेवास्तूत्पन्नशिष्ट २·
त्वाद्दुर्बलाः तस्माद्वैश्वदेवशब्दः कर्मनामधेयं । अत्र गुरुमतमाह गुणकामत्वसंदेहादप्रमा

चोदनेति चेन्नोक्तन्यायेन संख्यस्य नामधेयत्वनिर्णयात् स्पष्टोऽर्थः २४२२ गौ· यद्द्वादशकपाले हि वैश्वानरस्यानु
नरे एकतमष्टाकपालादि तद्गुणो नामवास्तीतिः ८ अतद्भावादष्टत्वादेर्नाम स्यादग्निहोत्रवत् द्रव्यं द्रव्यान्तरे नेत्व
गुणस्तर्हि फलत्वमा २ वाक्यैकार्थ्यस्य उपसंहाराद्धि स्पष्टत्वं तद्वा भाते नानागुणविधौ तस्मादंशद्वा विधिरा
स्तीतिः ३ द्वादशाधिकरणमारचयति काम्येष्टिकाण्डे श्रूयते वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते य
दष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो
विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन्पशू
न्दधाति यस्मिन्जात एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति अत्राष्टत्वादिसंख्या
सामान्यात्पुरोडाशानां गायत्र्यादिरूपत्वकल्पना कृता इष्टिविधायके वाक्ये येयं द्वादशसंख्या तस्याष्टत्वा
दिसंख्यानामतद्भावात्ताः संख्या निमित्तीकृत्याग्निहोत्रशब्दवदष्टाकपालादिशब्दाः कर्मनामधेयानीत्येकः पक्षः
नाद्वादशकपालेऽस्तीति वृत्तेः एवमष्टाकपालादि शब्दाः अपि तथा सति द्रव्यस्य द्रव्यान्तरे इनेन भावान्नामधेयस्य नि
भिन्नं नास्तीति चेत् एवं तर्हि पुरोडाशद्रव्यरूपो गुणो विधीयतां न चोत्पत्तिशिष्टद्वादशकपालपुरोडाशावरुद्धत्वाद
ष्टाकपालादेरनवकाश इति वाच्यं ब्रह्मवर्चसादिफलाय तद्धि उपपत्तेरित्यपरः अयमप्यनुपपन्नः बहूनां गुणानां
विधौ वाक्यभेदापत्तेः न च भिन्नान्येवैतानि वाक्यानीति वाच्यं वैश्वानरं द्वादशकपालं निर्वपेदिति विहितस्य यस्मिन्
जात एतामित्युपसंहारेणैकवाक्यत्वावगमात् तस्मादष्टाकपालादिभिरेभिर्द्वादशकपालः स्तूयते अत्र गुरु
मतमाह अप्रसक्तत्वादनामत्वादमन्त्रत्वादनन्वये अष्टत्वाद्यप्रमाणं चेन्नार्थवादतयान्वयात् ९ उक्तरीत्या ग

शङ्कः संख्यापरः
किंतु पुरोडाशद्रव्य
परः द्वादशकपा
ले पुंसस्तुतेः ४

२१ एवं नामत्वे वचनसंभवतीति न मत्वर्थलक्षणा मे त्रिणामभावान्न मंत्रत्वं आग्नेयाष्टाकपालादीनाम नत्वाद्यात अग्रिमापयवाक्यस्य
तिचेन्नैवं स्तावकत्वेनान्वयस्योक्तत्वात् ८४८२२ ३. यजमानः प्रस्तरो गुणो वा नामवा स्तुतिः सामानाधिकरण्येन न
२५ स्पाटैकस्यान्यनामता २ गुणो वा यजमानो स्तकार्ये प्रसक्तेर्लिङ्गिते अग्न्याभिलाषाभावेन सर्वं वचनाच्च संस्तुतिः २१
अर्थभेदाद्वनामत्वं गुणो बलुप्यते तस्य यागसाधकताहृयाविधेय प्रस्तुतिः ३ त्रयोदशाधिकरणमार स्तर्द
चयति इदमाम्नायते यजमानः प्रस्तर इति तत्र यजमानस्य प्रस्तरशब्दो नामधेयं प्रस्तरस्य वा यजमानशब्दो नाम
धेयं कुतः उद्भिदा यजेतेत्यादाविव सामानाधिकरण्यादित्येकः पक्षः गुणविधिरित्यपरः पक्षः तत्रापि यजमानका
नपा र्ये यागादौ प्रस्तरस्याचेतनस्य सामर्थ्याभावात् प्रस्तरकार्ये लूनग्रहणादौ यजमानस्य प्राप्तत्वाद्यजमानस्य प्रा
गुणो विधीयते एवं सति प्रस्तावक्लृप्तस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेपि प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्न विधे
तिं न च वाच्यमेवं न्यायेन स्तुतिः संभवति आग्नेयाष्टाकपालद्वादशकपालयोरिव प्रस्तरयजमानयोरैक्यस्याभावात्
कार्यैवेत्ते पिष्टादेवताऊर्ज्जोवरुध्या इत्यादिवत् स्तुतिरिति चेन्न चित्रत्वादिधर्मेकल्पस्य चित्रकर्षस्य प्रतीतेः
तस्मान्नामगुणयोरन्यतरत्वमिति प्राप्ते ब्रूमः गोमहिषयोरिवार्थभेदस्यात्यन्तप्रसिद्धत्वान्नामत्वं न युक्तं गुणत्वप
क्षे अग्न्याप्रहरणस्य प्रस्तरकार्यत्वाद्यजमाने प्रहृते सति कर्मलोपः स्यात्तस्माद्विधेयः प्रस्तरो यजमानशब्देन स्तूयते य
था सिंहो देवदत्त इत्यत्र सिंहगुणेन शौर्यादिना पेतो देवदत्तः स्तूयते तथा यजमानगुणेन यागसाधनत्वेन यु
क्तः प्रस्तरो यजमानशब्देन स्तूयते एवं यजमान एककपाल इत्यादिष्वपि द्रष्टव्यम् २४ चतुर्दशाधिकरणमा
रचयति इदमाम्नायते आग्नेयो वै ब्राह्मण इति अग्न्यादिप्रसिद्धा येयमाग्नेयशब्दो ब्राह्मणस्य

आग्नेयः इति श्लोको ग्रे लिखितः

दा २२

पशवो: पशुशब्देन प्राशस्त्याभावमात्रमतः तद्धास्तत्वनिमित्तंतु प्रशंसैवगवाश्वयो: ४९

नहिता २ शब्देन गुण: ४२

नामधेयं नाप्यपि देवतारूपेण गुणो विधीयते आग्नेयं सूक्तमाग्नेयं हविरित्येवं देवतातद्धितस्य सूक्तहविर्विषयत्वा

त्तं न हि ब्राह्मणः सूक्तं नापि हविः अतः संबंधवाचित्वेनाग्नेयो ब्राह्मणः स्तूयते यद्यपि ब्राह्मणो नाग्निसंबंधी तथाप्य यश

ग्निसंबंधी मुखजन्यत्वगुणेन ब्राह्मणो विद्यते तथा चाग्निब्राह्मणयो: मुखजन्यत्वं कस्मिंश्चिदर्थवादे समाम्नाते

स्त. ४ प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छंदो रथन्तरं साम ब्राह्म

णो मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यंतेति तस्मादाग्नेयशब्दः स्तावकः एवमैंद्रो राजन्यो वैश्यो वै

ह्य. श्वदेव इत्यादि द्रष्टव्यं २४२५ आग्नेयो ब्राह्मण इत्यत्रापि एवं तत्त्वनिर्णयः द्वारेण मुखजन्यत्वमात्रे यत्वेन

संस्तवे ४ आदित्यो यूपः यूपत्वेन स्तुत्यादित्यत्वशब्दतः द्वारेणात्र यसारूप्यं हि तत्तेजस्वित्वात् २ पशवो वान्ये गवाश्वे १

भ्यो यशवो वा इति श्रुतं अजादिषु पशुत्वं यन्न गुणवादो यथा स्तुतिः २ स्तुत्यभावात्तगुणस्तेषु पशुकार्यनिषेधने

अशक्यत्वान्निषेधस्य यद्यप्यर्थाभिधायिता २ एवं दशाधिकरणमारचयति आदित्यो यूपः तेजस्

तद्रूपेप्यस्ति हुताशस्य यूपस्य तेजस्वित्वादसायात स्वित्वं तद्धुताशनानिमित्तं यूपेपि विद्यते अतस्तद्वारादित्यत्वादेव यूपः स्तूयते यजमानो यूप इत्यत्र च द्वारगस्य स्तो

त्रस्य यजमानयूपयोः समानत्वाद्यजमानशब्देन यूपः स्तूयते २४२९ षोडशाधिकरणमारचयति इदमाम्ना

अ. यते अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इति अजादिषु श्रूयमाणं यदपशुत्वं तस्यार्थवादत्वेन संभ

वति पशुत्वनिषेधमात्रेणास्तुतेरप्रतिभानात् ततो पशुकार्यनिषेधरूपो गुणो विधीयत इति चेन्मैवं अज

दिषु पशुविधिवैयर्थ्यप्रसंगेन निषेद्धुमशक्यत्वात् अपशुशब्दः पशुव्यतिरिक्तं च रादिपदार्थमभिदधाति तस्मि

न्नद्यादौ गवाश्ववत् प्राशस्त्यं नास्तीत्याशयं प्राशस्त्याभावोऽजादिषु पशुष्वस्तीत्यनेनाभिप्रायेण स्तावक एव संतोषः

ज्ञानद्योगयागादिसाम्यादपशुयागेन तत्त्वं प्रतीतं सर्वं च यजमानकार्यं सिद्धिरतो नेयमृत्विक्ज्ञप्तत्वमादित्यतेज स्विनं च यजमाना
दिशब्दानां प्रस्तरादिवदर्थवादपरत्वे निमित्तं तत्स्तुतिफलं प्रस्तरादि प्रशंसा इह तु अपशुशब्दस्याज्यादिषु प्रयुक्तो गवाश्व
योः प्रशंसैव निमित्तं फलं द्विप्रकारा हि प्रशंसा वस्तुनि विद्यमानो गुणोत्कर्षः एकः प्रकारः स्तावकेन शब्देन सर्वपा
दितो गुणोत्कर्षोऽपरः गवाश्वयोरजादिभ्य उत्कर्षो लोकप्रसिद्धो यः सोऽत्र निमित्तं अजादयः स्वभावतः पशवो
पि गवाश्वापेक्षया अपशवः संपन्नाः इदं योग्यं गवाश्वयोर्महिमेति स्तुतिफलं तस्मादपशवो वा इत्ययमर्थवादः अ
यमेव न्यायः उदाहरणांतरेष्वपि योजनीयः अयज्ञो वा एष योऽसामेत्येकमुदाहरणं असंवत्सरं ... छंदोमं मित्यु
परमुदाहरणं अग्निहोत्रं दर्शपूर्णमासादियज्ञोपि सामहीनत्वादयज्ञो भवति इदं यः सामत्र महिमा छंदोमं पांचलावि
शस्त्वत् स्तुत्वा विंशति इत्येते त्रयः स्तोमाश्चोच्यंते अक्षरसंख्यासाम्येन गायत्री त्रिष्टुब्जगती छंदांसि ... यमानमान
त्वात् तेषां विकृतिः सामत्राणोद्रव्यं ... ततः सत्रमपि चतुर्दशरात्रादिकं छंदोमरहितत्वादसत्रं भवति इद
यः छंदोमानां महिमेत्येवं स्तावकत्वादर्थवादत्वं ॥ सृष्टीरुपदधातीति यमं चात्र सृष्टि लिंगकाः विधि
यास्ते गुणत्वेन वादोनां गुणविधिः १ आख्यातानामिसंबंधाद्विध्यंतरयोगतः लिंगप्रकरणप्राप्तमंत्राणां
विधासंभवात् २ तानत्र विषयकाधाने विधानं ... यतः यथास्पृष्टत्वेन नातः सृष्टिसिद्धयभावाद्गीः २१
एकपात्त्वेन ... सृष्टिशब्देन मतः ४ सृष्टिवत्त्वात् ...
सादृश्य लिंगममतः ... लिंगसमवायो विधीयते १ समस्तशास्त्राधिकरणमारचयति १
अग्निचयने श्रूयते सृष्टीरुपदधातीति सृष्टिशब्दोपेतामंत्रा यासामिष्टकानामुपधाने विनियुक्ता इष्टकाः २२

ते मंत्रा अत्र सृष्टिशब्देनोपधाने गुणत्वेन विधीयन्ते अतः उपदधातीत्यनेनाव्यक्तेनापि सिद्धं यथा २
तत्र

सृष्टीरुपदधातीति सृष्टिमान्त्राणां सामान्यधाने मंत्र इति विग्रहे न तासां सामान्य उपधानद्रव्यादि व्याकरणसूत्रसिद्धप्रक्रियया
तन्निष्पादनात् सृष्टिशब्दोपेतानामुपधानमंत्राणां प्रकृतौ यावन्तस्मिन्ननुवाके समाम्नाताः अवान्तरजातिभूतान्य
सृज्यतेऽन्यादिना सृजतिधातोरेव प्रयुक्तत्वात् नैवार्थवादत्वं संभवति विध्यन्तरेण सह एकवाक्यत्वाभावादि
ति प्राप्ते ब्रूमः अग्निचयनप्रकरणपठितत्वात् तेषां मंत्राणां सामान्यतश्चयने संबंधोऽवगम्यते विशे
षसंबंधस्तु सृजतिलिंगादवगन्तव्यः तथा सति प्राप्तत्वान्न ते मंत्रा अत्र विधीयन्ते किं तर्हि तान्मंत्रानन्यो
द्देशकोपधाने विधीयते सृष्टिशब्देनानुवादस्तु वक्ष्यमाणार्थवादेन पञ्चार्थः यथा सृष्टमेवावरुन्ध इति
दिन्न हि वक्ष्यमाणोऽर्थवादः यदि विधिवाक्ये मंत्राणामनुवादकः सृष्टिशब्दो न स्यात् तदानीमर्थवादे
थ्रमःस्यात् सृष्टिशब्दप्रयोगात् विध्यर्थवादयोर्वैयधिकरण्यं स्यात् मंत्रानुवादी सृष्टिशब्दो न गुणविधायकः कि
न्त्वर्थवादानुगुण्यमस्य च सृजतिधातोर्न प्रयुक्तः किं तूपदधातीति धातुः एकया स्तुवत प्रजा अधीयन्त प्रयुक्तः
थ्र ति प्राणवान् ... तथापि हितीयतृतीयादिषु ... मंत्रेषु सृजतिधातुप्रयोगो न सर्वपक्षे दृष्ट
मस्ति यत्र सर्वाणि वाक्यानि सृष्टिशब्दोपेतानि तत्र यथा सृष्टिभूतानया चार्यो तिष्ठ मन्त्रगणयोगोऽस्य म
प्रसृष्टिसंघे सृष्टिशब्दप्रयोगः (लिंगसमवायात्) प्राणभृदुपदधातीत्यत्रापि सृष्टिन्यायेन मंत्रवि न उपन
धिरिति पूर्वः पक्षः लिंगप्रकरणप्राप्तमंत्रानुवादेनैकोपधानविधिः एतस्यैव प्राणभृदुपदधातीत्यस्य
वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृत्त्वेन मंत्रानुवादः अयं वै प्राणिति यादि मंत्रेषु सृष्टिलिंगवाहुल्यमि

अत्र प्रधानाधिकरणमारचयति सृष्टिरिति

हन्प्रथममेवपवमाणाल्लिंगमाम्नायते अयं पुरो भुवस्तस्य प्राणो भौवायनऋतिं एकस्यैव मंत्रस्य प्राणभक्षेपि कं त्रि
२२ णोगच्छतीति वचनस्य हृच्चरितः सर्वे मंत्राः प्राणभक्षेपि नलस्यं ते तदेवयजमानकार्यं सिद्धादयो गुणा हृन्निहि
तवोनिर्णीताः तथाचोक्तं नन्विह हि जातिसाध्य प्रपञ्चस्यालिंगभूमभिः षड्भिः सर्वत्र प्राह्णानां गौणेति
त्रिः प्रकल्पितेति॥ एकोन शार्कराडपधते क्षारस्तेजो वै घृतमत्र किं तैलादिनापि तान्यक्षाण्यनैवाधवं
तं १ तैलादिनापि मुख्यत्वात् संज्ञा न विरोधनात् अप्रामाण्यं न तु विधेर्वीदाहृलित्वतः २ सामा ष्वास्य॥
न्यमनन्तहेयं विशेषस्तुविनेहि घृते नैवाज्ञं वाक्यशेषात्स्यादिग्धनिर्णयात् ३ अर्थवादगताद्वेयस्तति
धौ न्यमनन्तहेयं विशेषस्तु विनेहि घृतेनैवाञ्ज्याद्वाक्यशेषात्स्यादिग्धनिर्णयात् ३ अर्थवादगतात्तेयस्तवि विशाधिकरणं॥
दं तस्य पेक्षया बोधयंती विधयत्वं घृतस्यागमेयहि धि ४ स्तुवेणास्वधितिनाहस्तेनावयती यमी॥
अन्यो वा सेष्वोऽडशोसेकी एंवाव्यवस्थिताः व्यवस्थापकराहित्यात्स्व वा घास्रव्यवस्थिताः व्यवस्थाप
कतायाकेस्तह प्रानव्यवस्थितिः २ एकोनविंशाधिकरणमारचयति अक्ताः शार्कराडपदधा
ति तेजो वै घृतमितिश्रूयते प्र त्रिका मिश्रणाद्रूपाधाणाः शार्कराः तास्य घृततैलवसादीना
मन्यतमेन द्रव्येणाञ्जनीयाः कुतः अञ्जनसाधनसामान्यबोधकस्य विधिवाक्यस्य घृतविशेष
त्वादसंज्ञातविरोधित्वेन प्रापितार्थबोधकत्वादप्रामाण्यं न अर्थवादस्य विधिस्तावकत्वाद
प्रत्येक मप्रणतव्यावसंज्ञान विरोधी घृतातर्थ्यान्तवादित्वात्सामाप्यार्थः तस्मादेनकेनाप्यञ्जनमिति २२
प्राप्ते ब्रूमः विधिवाक्ये नाकिमञ्जनसाधनसामान्यविधीयते तस्य हि शेषाविलापः सामान्यस्यानन्ये ष्व
बोधकार्द्ध्यवादान्यबलत्वात् तस्माद्बल्येच मुख्यत्वादयस्त्वयोस्तेनवः सार्थतया विधेः सैव प्रथम प्रस्तुतस्य २

न्यां द्वितीयः पक्षः शक्तैतद्गत्यत्वश्यत्तैलादिविशेषवाचकशब्दाभावात् ननु ऊर्ध्वत्वपात्रमपि विधिगा
कं अनुष्ठानयोग्यविशेषसंदेहजनकतया निर्णयहेतुमर्थवादमपेक्षते तेन ततेन सह इदं विरुध्यते अर्थवा
दे पिनुतस्य विधिनां सत्तीति चेन्न विधेरनुपेयत्वात् तेजो वैयज्ञमिति त्यवंतेजस्वेन तु तस्य उपमानत्वात् वि
धेयत्वं गम्यते यल्लभ्यते तद्विधीयत इति न्यायात् न च विधेयत्वेन विधायकः शब्दः कल्पते हुतेनाक्ताद नैः
स्रुवे तेति तितस्मात् स्रुवतेनैवाजनं विशेषाधिकरणमारचयति १४२० स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनाव
नी द्यति श्रूयते तत्रावदेयपाज्यपुरोडाशामांसद्रव्यविषमीस्रुवाद्याश्रवदानहेतवः संकीर्णाः उत व्यवस्था य
कस्यपक्षस्याथावादिति चेन्नैवं शक्तेर्व्यवस्थापकत्वात् आज्यादानानामर्थं स्रुवताशक्तिः सहतका
ठिनीति न्यायात् कटेशुक्तेकास्य पांसां शुक्तेरित्यत्र लौकिकास्तन्दस्वाधारेण व्यवस्थाकल्पयंति कटे
शासीनः कांस्यपात्र्यामोदनं निधायेति वेदपाणिना स्रुक्तुमादाय जुहुयादिति अत्र यद्यपि हिहस्त
संयोगो जुहोति पाणि गृह्यदेवतादिप्रसादनार्थोञ्जलिवद्भिद्रदं संयोगानभवति तादृशाञ्जलौ सक्तूनाम
वकाशाभावादतः सामर्थ्यात्संयुक्तः प्रसृतिद्वयात्मको मध्यगतावकाशोपेतोञ्जलिर्गृहीतः एवमत्रापि द्र
वद्रव्यस्याज्यस्य स्रुवो योग्यः छेदनीयस्य मांसस्य शास्त्रविशेषः स्वधितिः संहतस्य पुरोडाशस्य हस्तेऽन्यस्य नेनश
कावेनावदानवाद्या व्यवस्थिताः इति श्रीमाधवीये जैमिनीयन्यायमालाविस्तरे प्रथमस्याध्यायस्य चतुर्थः

२४ पादः समाप्तः प्रथमोऽध्यायः ॥ प्रमाणत्वमुपजीव्यत्वात्प्रथमेऽध्याये इति ॥ मानाधीनत्वाद्धर्मस्य द्वितीये भेद
उच्यते अनेनेत्यस्माद्द्वितीययोरध्याययोः संगतिरर्थवदुपपादितः ॥ विधिवाक्ये पदैः सर्वैरपूर्वं प्रतिपा
द्यते प्रत्येकमथ चैकेन सर्वस्य प्रतिपादने १ फलान्वयित्वात्सर्वेषां प्रधानान्वयलाभतः लाघवादेकवो
धत्वेन तद्भेदस्तु पदान्तरं २ द्वितीयस्याध्यायस्य प्रथमे पादे प्रथमाधिकरणे प्रथमवर्णकमारचय
ति विधिवाक्यमदृष्टार्थमखिलमत्रोदाहरणं विधिवाक्ये यावन्ति पदानि सन्ति तानि सर्वाणि क्रि
याकारकसंबंधमनन्यलभ्यं प्रत्येकमपूर्वस्य प्रतिपादकानि कुतः अपूर्वफलत्वेन सर्वेषां पदानां फलान्व
यित्वात् अपूर्वप्रतिपादनाभावे हि क्रियाकारकयोः परस्परान्वयोऽस्य नैवेति चेत्सत्यं तथापि प्रधाना
न्वयोऽलभ्येत फलं हि प्रधानं प्रत्यर्थं तया साध्यमानत्वादिति प्राप्ते ब्रूमः अपूर्वस्य प्रत्येकमदृष्टत्वादे
ककस्य नैव वाक्यस्योपपत्तावनेककल्पने गौरवं स्यात् तस्मादेकमपूर्वमेकेन शब्देन प्रतिपाद्य
ते पदान्तरं तु तद्भेदतयान्वेति ननु यस्य पदस्यार्थोऽपूर्वं स्यात् कल्प्यकल्पत्वदार्थस्य फलसाधनतया
पूर्वमेकेन शब्देन फलं प्रतिपादयत्यविधेयत्वगुणत्वान्यथानुपपत्ति तानि तथा स्थैव शेषभूतप
दानर्थं प्रत्युद्दिष्टत्वान्न्यायत्वं प्रधानत्वं नामपि प्रसक्तत्वाद्धि रूढिर्निकटतया प्रतीयत इति चेन्नैवं उद्भि
दा यजेत पशुकामः एतेनैवाभिचरन्निति त्यादौ उद्भिदादिशब्दानां नामत्वेनान्वयेऽनियामकत्वा २४

धनवाचित्वाभावेन यजतावुद्देश्यत्वादि त्रिकापादकत्वाभावात् तस्मादेकमेव पदमपूर्वं प्रतिपादकं न त्वधर्म
भेदचिंताप्रसक्तौ परिमन्यत्किमित्यपूर्वं चिंत्यते इति वाच्यं अपूर्वं स्यैव धर्मत्वात् ॥ द्रव्यादिशब्दानामपूर्वधी
श्रीवार्थं पदांतर इत्यादीनां फलार्थत्वात्तत्कृते न स्यात् पूर्वधीः २ क्रियाद्वारमस्त्येतद्द्रव्यफले न न हि युज्यते भावना
वाचिनोपूर्वमाख्यातादवगम्यते २ धात्वर्थव्यतिरेकेण भावनाना नेतिचेन्नतत्र सर्वधात्वर्थसंबंधकरो
त्यर्थो हि भावना ३ द्वितीयं वर्णकमाह धात्वर्थः करणं तस्मात्समपदवर्णितः इत्याद्युपश्रुतिर्दृसाधा
त्वर्थोत्पादनात्मिका दृष्टमाम्नायते सोमेन यजेत हिरण्यमात्रेयाय ददाति तस्मात्सवर्णं हिरण्यं धा
र्थं रूपेणनापि चरन्यजे त चिन्नायायजेत पशुकाम इत्यादितत्र सोमहिरण्यशब्दौ द्रव्यवाचिनौ सवर्ण
शब्दो गुणवाची रूपनचिन्नाशब्दौ कर्मवाचिनौ तेनैद्रव्यादिशब्दैरपूर्वं प्रत्येति श्रोताः इत्यादीनां सिद्धरू
पाणां साध्यं फलं प्रति साधनत्वसंभवाद्यागदानादिरूपस्य भावार्थः स्वयमपि फलवत्साध्यरूपत्वान्न सा
धनत्वचिंतामर्हतीति ततो द्रव्यादीनां फलं प्रति करणत्वात्तद्द्रव्यादिशब्दा अपूर्वप्रत्यायकाः इति प्राप्ते
ब्रूमः क्रियां विना द्रव्याणि फलं साधयितुं न क्षमंते पचि क्रियामंतरेण काष्ठस्थाल्यादीनामोदनसाधक
त्वादर्शनात् अतो भावनावाचिनां यजतिददातीत्याख्यातेनापूर्वं प्रतीयते ननु धात्वर्थ एव भावनात
त्वाव ततावद्धात्वर्थः तस्मात्तां प्रति करणत्वोक्तेः न हि द्वितीयः धात्वर्थव्यतिरिक्तायाः क्रियायाः इत्यादि
तिचेन्मैवं सर्वधात्वर्थसंबद्धरूपेणलक्षयितुं शक्यत्वात् तदुक्तमाचार्यैः धात्वर्थव्यतिरेकेण यय[illegible]

यानलक्ष्य तेन यथापि सर्वसामान्यरूपेणैव गम्यते इति अन्यैरप्युक्तं सिद्धसाध्यस्वभावाभ्यां धात्वर्थो हि द्विविधस्त
२५ योः अन्योत्पादानुकूलात्मभावना साध्यरूपिणीति पचतीति तिङ्क्तेः पाकं करोतीत्येवं समर्थ्यं जनाः प्रतिपद्यन्ते इति न च सर्वे
पाकः पक्तिः पचनमित्येतैः शब्दैः व्यवह्रियमाणो लिंगकारकसंख्यायोगो धात्वर्थः सिद्धस्वभावः करोतीत्य
नेन व्यवह्रियमाणो लिंगाद्यपेतः साध्यस्वभावस्तत्र सिद्धस्वभावद्योतनाय यथायथं घञादयो विहिताः तथा
साध्यस्वभावद्योतनायाख्यातप्रत्ययविधिः संख्यातप्रत्ययार्थाद् ओदनो न्तरेणानुक्ताः ततो भुक्तिरोदनस्य प्रयोज सा°
कव्यापारत्वात् । ण्यन्तेन भावनाशब्देनोच्यते इत्यत्रैव भावनाश्रुतः प्रयत्नो भावनेति चेन्न रथो गच्छती पत्ता°
न° त्यचेतनाव प्रसंगात् स्पंद इति चेन्न मानसत्यागरूपे यजनाव्याप्तेः उभयसाधारणमुदासीनत्वविच्छे
द सामान्यं भावनेति चेन्न शाब्दभावनायामव्याप्तिः नहि शब्दस्य विभोरचेतनस्य स्पंदः प्रयत्नो वा
स्ति लिङ्लोट्तव्यप्रत्ययमात्रगता शाब्दी भावना सर्वाख्यातगतार्थभावना धात्वर्थः करणं
तस्याः समानपदवर्णितः इत्याद्युपक्रम्य निर्दिष्टो धात्वर्थोत्पादनात्मिका ... तदुक्तं अभिधाभावनामाहु
रन्यामेव लिङादयः अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते इति किंच स्पंदादिवादिनोपि तस्य रूपेण
स्पंदादीनां भावनात्वमाहुः किंत्वन्योत्पादानुकूलस्य रूपेण स्पंदादेर्भावनात्वं यथा पचतीत्यत्रौद
नफलोत्पत्त्यनुकूलत्वं यथा यजतीत्यत्र स्वर्गादिफलोत्पत्त्यनुकूलत्वं तस्याश्च फलभावनायां वाच्या प्रत्ययार्थं २५
यामकपदोपात्तत्वेन प्रत्यासन्नत्वात् प्रकृत्यर्थः करणं न तु द्रव्यादि तस्य पदान्तरोपात्तत्वेन विप्र

कष्टत्वात् साध्यत्वरूपोपि प्रकृत्यर्थः स्वसाधनतिष्पादितः सन् प्राप्नोति फलं साधयितुं द्रव्यादीनां प्रकृ
त्यर्थोत्पादनेन दृष्ट एवोपकारः द्रव्यादिनिष्पादिते न धातुवाच्येन यागादिकरणेन स्वर्गादिफलो
म्ता॰ त्पत्तावेयमनुकूलव्यापृतात्मा कृतिः प्राधान्याभिधेया फलोत्पादनाभेयं यज्यादिधातुना नामन्यतमेन के
नापि नाभिधीयते सर्वत्र धात्वर्थानुयायित्वादतो न भावनायाः प्रकृत्यर्थत्वमाशंक्य किंतु शक्यमस्त्येव नहि
ते॰ धात्वर्थसामान्यमेव भावनेति चेन्न प्रतिधात्वर्थं विलक्षणरूपत्वात् न्यहि पाकस्यौदनं प्रत्यानुकूल्यं अन्य
थागमनस्य संयोगविभागौ प्रति अन्यस्यापि फलविभागानुपपत्तेः भिन्नास्त्वपि भावनात्वसामान्यमनु भावना॰
ता॰ वर्त्तमानं नामनेन तावत् प्रकृत्यर्थसामान्यं तत्तु भवति तस्माद्विशेषरूपात्सामान्यरूपाच्च यज्यादिधातुवा
च्यादन्यैवाख्यातप्रत्ययवाच्या भावनाख्यास्ति तिङ्गेनैव ह्याख्यातस्य भावयेदित्यर्थो भवति तत्र किं भावये
त्केन भावयेत्कथं भावयेदित्याकांक्षायां स्वर्गं भावयेद्यागेन भावयेद् प्रयाजाद्युपकृतादि मि
त्थं यथाप्रकारं संपाद्य भावयेदित्येवं भाव्यकरणेतिकर्त्तव्यतासमर्पणेनाकांक्षापूरणात् प्रकरणसम्पन्नः
सकलः शाब्दः संदर्भो भावनावाचिनाख्यातस्यैव प्रपंचः भाव्यं येन शब्दे वर्त्तते सेयमर्थभावनेत्युच्यते साम
भावना॰ र्थ्योपि पूर्वाह्नभावनायाः भाव्या विधायको लिङादिः करणं अर्थवादिसंपादितास्तुतिरितिकर्त्तव्यता सेयं शब्द
भावना लिङादिभिरवगम्यते अर्थभावना तु सर्वैराख्यातप्रत्ययैर्गम्यत इत्युक्तं तत्संगत्यार्थभावना

यास्वर्गस्य भाव्यत्वं कर्मयोगादवगम्यते अकृत्यर्थस्य करणत्वं तृतीययाश्रुत्यां तथा च श्रूयते दर्शपूर्णमासा
२६ भ्यां स्वर्गकामो यजेत चित्रया यजेत पशुकाम इति तच्च करणत्वम् अपूर्वकल्पनामंतरेण न संभवतीत्यभि
धास्यते तस्मादाख्यातप्रत्ययालाङ्ग्रावर्ण्य पदादपूर्वं गम्यते चितामायोजनं न समर्थं पदे तद्व्याख्यापचारेऽप
त्तिविधभावः सिद्धांतेन तत्सद्भावः द्वि- अपूर्वसद्भावसंशये सतिनास्तितत् मानाभावात्फलं
यागात्तु सिद्धेः कास्तु प्रमाणतः १ क्षणिकस्य विनष्टस्य स्वर्गहेतुत्वकल्पने विरुद्धमानतेरणतः
श्रेयोऽपूर्वस्य कल्पने २ अर्थान्तरव्याहतिर्वी शक्तिर्वी यागगोच्यते अपूर्वमिति तद्भेदः प्रक्रिया
नोवगम्यतां २ द्वितीयाधिकरणमारचयति एवाधिकरणे वर्णकाम्यायदिदमन्नोय
नां र्वस्यैकमेवपदं प्रत्यायकं नच यजेतेत्याख्यातं भावार्थमिति तदनुपपन्नं अपूर्वे सद्भावे
त्वां मानाभावाद्यजेते भ्यां प्रकृतिप्रत्ययाभ्यां करणभावनयोरभिधानात् अपूर्वाभावे कालांतर
पप भाविस्वर्गसाधनत्वं विनष्टस्य यागस्यानुपपन्नमितिचेन्न शास्त्रप्रामाण्येन न तदुपपत्तेरिति प्राप्ते
ब्रूमः दर्शपूर्णमासाभ्यामिति तृतीययाश्रुत्या तावत् यागस्य स्वर्गसाधनत्वं प्रमितं तथा चोत्पन्न
